Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO. NEW 270 OLD 241

FOLIO 106

TITLE
अनुमानमणिदीधितिः

श्रीगणेशायनमः॥ॐनमःसर्वभूतानिविश्वभ्यश्चैविश्वतः॥अखंडानंदबोधायपूर्णायपरमात्मने॥१॥अध्ययनभावनाभ्यां सं
स्तिर्णीयनिखिलतंत्राणां॥दीधितिप्रधिचिंतामणिंनत्वातार्किकशिरोमणिःश्रीमान्॥२॥यद्यप्युदयनगंगेशवर्धमानप्रभृतिभि
रसाक्षिप्युदकोपैः॥रघुनाथकवेरपिदोषानूचिरेवादिदुर्मतनोत्तमोदं॥३॥न्यायप्रबोधेसर्वस्तनुतेकृतकृत्यबंधमयत्र॥अस्य
बुद्धिप्रधिरहस्यंकेचनविज्ञातुमीशतेसुधियः॥४॥प्राच्यान्त्रणाप्यविहितांजलिरेषभूयोभूयोविधायविनयंविनिवेदयामि॥दूष्यंयत्तो
प्रमयरंनिपुणंविभाव्यप्राकाशबोधविहितोनधुनोतिदोषः॥५॥पूर्वापरग्रंथैकवाक्यतापत्तयेशिष्याणांप्रबोधनायचसंग
तिंप्रदर्शयन्॥अनुमानंनिरूपयतिपक्षतांजानीतेप्रत्यक्षविरहि अत्रोपजीव्योपजीवकभावःफलतःस्वरूपतश्च प्रत्यक्षफल
मानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेपिनसर्वाप्रत्यक्षप्रमितिस्तथा॥अनुमितिनयस्तुसर्वैःसाक्षात्यंपरयावाच्या
दिप्रत्यक्षोपजीव्यिकाःपुरस्तूनभ्यायमुपजीवकोत्कर्षः॥यद्यपिसकलमेवप्रत्यक्षफलमुपजीवत्यदृष्टजननीसमयमत्व
र्तव्यतापरिष्ठेहिकामनुमितिंईश्वरप्रत्यक्षंतुनफलंतथापिदृष्टद्वारकमिहतथात्वमादरणीयं इतस्याविनिगम्यत्वात्सर्ववानुमिति १

करणेन्द्रियाधेयोत्पत्तिकं अनुमितिभावयतोयीश्वरज्ञानस्यतत्करणतानिर्वाकप्रत्यासत्तिविरहेणातत्त्वात् सर्वपुनरिंद्रि
यंनानुमानाधीनजन्म मनःश्रवणयोर्जन्यत्वात् दृष्टद्वारवात्तत्प्रहारणीयं नचौत्पत्तिप्रदर्शीद्रियं दृष्ट द्वारकमनुमानमपेक्ष
ते अप्युपजीव्यनिरूप्यैवोपजीवकंनिरूप्यत इतिनियमः क्वचित्कार्येनिरूप्यकारणनिरूपणादितिचैत्तिंयातः । नहि
संगतिरनंतरानिधानव्याप्ता आनंतर्याभिधानप्रयोजकजिज्ञासाजनज्ञानविषयोत्यर्थः संगतिः आयतेचकार्येकारणेवाज्ञा
तेकारणत्वस्यकार्यत्वस्यचज्ञानात्तिप्रत्यकारणंकार्यंचेतिजिज्ञासाजनत्वयोर्दुर्वारेवसंगतितं इत्यंचोपजीवकतायास्तु
ल्यत्वेपिनक्षतिरितिप्रंतव्यं लाघवायत्रैवोपमानस्यसंगतिंदर्शयति वहुकाहीति सुप्रसिद्धत्वान्निरसनीयात्यवादिविप्र
तिपत्तिकत्वेनसुप्रतिपन्नत्वाच्चानुमानएवव्युत्पित्सोःप्रथमंजिज्ञासा नोपमाने अप्रसिद्धत्वात् निरसनीयवहुत्वादिविप्र
तिपत्तिकत्वेनातिदुरूहत्वाच्च औत्सर्गिकीतिमनुसृत्यचेदंनोक्तप्रथमंकस्यचित्दुरूहेजिज्ञासोदयेपिनक्षतिः तथाचाय
सरसंगत्योपमाननिरूपणमितिभावः यथाचवत्सरस्यसंगतित्वेनयोक्तमाकरे शृङ्खलान्तरसमवधानकंसप्रवृत्तिनिमित्त

लबोधकंसामान्यतोदृष्टंनतोऽन्यदृष्टजनकप्रवृत्तौयंकंचानुमानमपेक्षतेनिखिलमेवोपमानमितीहापिउपमीवकत्वमेवसं
गतिरित्यधिकेनिति संभवतिचेहनिरूपणयोरपिकार्यकारणभावः अथतत्पूर्वकमित्यादिसूत्रेतत्पूर्वकत्वेनानुमाननिरूप
णात्तत्रहेतुव्याप्तिप्रत्यक्षपरामर्शादत्रापिसहचारप्रत्यक्षजन्यत्वादितिनानिरूपणात्तस्यप्रत्यक्षनिरूपणाधीनत्वात्
एवमनुमानभिन्नत्वेनोपमाननिरूपणात्पप्यनुमाननिरूपणापेक्षत्रितिसंक्षेपः॥ ॥तत्र लक्षणस्वरूपप्रामाण्यादि
भिरनुमानेनिरूपणीये करणव्यक्रियाभेदभिन्नमूर्तिकर्तृव्याक्रियालक्षणपूर्वकंतल्लक्षणमाह व्याप्तीत्यादिना अत्रव्या
प्तिविशिष्टपक्षधर्मतोयत्साधनाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्मधारयेनाभावप्रत्ययस्यपदार्थत्वावच्छेदक
दूयसामानाधिकरण्यवचनत्वात्तज्ज्ञानपदोपसंहारेनचाधित्वाधित्वसाधारणतत्त्वज्ञानलाभान्नभ्रांतानुमित्याप्तिरि
त्यादुः तत्र परामर्शेननियमतोव्याप्तिवैशिष्ट्यादिसाधनाधिकरण्यग्रहेनाभावात् गौरवेणतद्विषयकत्वेनाहेतुत्वात्संबं
धसंबंधाग्रहेपिविशिष्टज्ञानत्वसंभवाद्व्याप्तिग्रहस्यलैंगिकसाधनाधिकरण्यस्याप्रसिद्धात्तज्ज्ञानस्याप्यभावाच्च २

स्यच परामर्शो व्यापकत्वात् नचतदुभयविशिष्टस्तियतधर्मावच्छिन्नकारणतायतियोगिककारणतानाश्रालिस्वमर्थः पक्षधर्मतो
पादानवैयर्थ्यात् अग्निविशिष्टव्याप्तिप्रकारकंयत्पक्षधर्मताज्ञानंतज्जन्यमितितुस्यात् यच्चव्याप्तीधनसमानाधिकरणसंताभा
वप्रतियोगिज्ञानवहेदकवन्हित्वावच्छिन्नवन्हिसमानाधिकरणोधूमयानिस्वाहिपरामर्शजन्येऽप्यव्याप्तिः अनवस्थाव्याप्तेरप्रसिद्धेः
भ्रमानुमितेर्लक्ष्यत्वेचात्राकाशात्मनइत्यादौलितरांतथा तथापित्वावत्यहार्यानांतथाविधपरामर्शेपक्षेषावगाहित्वमात्रंविवक्षि
तं नचव्यतिरेकिण्यव्याप्तिः व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्तेरनुमानात् भवतिहिधूमसमानाधिकरणसं
ताभावाप्रतियोगिवन्हिसमानाधिकरणवृत्तिधूमत्वे वन्ह्यभावव्यापकीभूताभावप्रतियोगित्वंहित्तेनियमतोव्यभिचारधीप्र
तिरोधः तथाविधधूमसमानाधिकरणत्वादिकंतुनतथा तत्सभाहीनतद्धेतुत्वे व्यभिचारग्रहात् व्यतिरेकसहचारेणान्वयव्याप्ति ग्र
हणमप्रयोजनं नचभ्रमसंशयोत्तरप्रत्यक्षंप्रतिविशेषदर्शनस्यहेतुतामतेतत्रेतिव्याप्तिः तथाविधनिश्चयत्वेनहेतुतायाविव
क्षितत्वात् विशेषदर्शनस्यभ्रमादिविरोधित्वेनतत्त्वनियमात् अतएवलिंगत्वादिलक्षणमतिदेशवाक्यार्थज्ञानजन्योपमितौ
नातिप्रसंगः तथाविधवाक्यार्थप्रतिसंधानत्वेनतस्यहेतुत्वात् नचोपनयार्थज्ञानजन्यन्यायार्थज्ञानेतच्छब्देनसंकेतितशब्दांतरेण ३

स्मृत्युत्पादात् अपि संस्कारजनकत्वेन ज्ञानजनकतावच्छेदकरूपांतरापरिचयात् अन्योन्याश्रयप्रसंगाच्च संस्कारानुरोधेनैवास्मरणसंभवे
स्मृतिजनकतायांतद्प्रवेशाच्च नाप्यनुभवत्वेनतत्पाके संस्कारस्यफलनाश्यतयासकृदनुभूतस्यस्मरणोत्तरमस्मरणप्रसंगात्
समानाकारस्यैवफलनाश्यत्वात् समूहालंबनादितोनैकैकगोचरकमिकस्मरणानुपपत्तिः आयतेचपुनःपुनःस्मरणात् दृढतरसंस्का
रः परित्यज्यचनिश्चितान्यभिचारंकरुप्रंथ्यमाणान्यभिचारंकरणकारणत्वकल्पनानुहयात् दृढमेवचान्यत्रसामान्यस्यहेतुतावच्छे
दकत्वेबीजं अग्निहिनंचनात्यर्थदीर्घायांप्रथमसूत्रेअवयवविवेचनेवाचस्पतिमिश्रैः स्मृतीनांस्वकार्यविशेषिणीनांप्रसह्यभावादिति
चेन्न चारमज्ञानप्रतिबंध्यानुभवपरत्वात् साक्षात्ज्ञानजन्यत्वस्यविवक्षितत्वादित्यधिकमस्मिन् किंचव्याप्यविशेष्यकत्वंअविशेष्यकाच्च
प्रमाप्रमाहनुमितिदर्शनात्तदुभयंवैशिष्ट्यावगाहिनिश्चयत्वेनतत्रहेतुत्वंलक्षणघटकप्रविष्टमेवएकतरविशेष्यकज्ञानादन्यतरवि
शेष्यकस्मरणाभावात् अन्यथानियमेनस्मृतेरुभयविशेष्यकतापत्तेःप्रमानप्रकारकत्वेनैवज्ञानस्मरणयोःकार्यकारणभावाच्च तत्रवि
शिष्यैवकार्यकारणभावः ननूक्तरूपेणगौरयमानाभावाच्च एवंचविशिष्टवैशिष्ट्यबोधाहौक्यापत्तिरंकापिवन्ह्याद्यनुमि
तौवन्ह्यादिव्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतायामेपिनिरंतरंतत्तत्पक्षलक्षणेपिनिवेशात् अन्य

१ एवव्याप्यवत्पक्षाद्यभावग्रहेप्यनिव्याप्यत्वसंशयाहिज्ञानत्वेन हेतुत्वेपिनक्षतिः १

मानस्यतर्कस्यैवहेतुहेतुमद्भावसंग्रहेतत्तस्यैववाव्याप्तिपरिहारकत्वात् विपर्ययेतरकोटिमात्रपर्यवसायिनश्चतर्कस्यतद्भाव
कोटिकथंकथमित्यतर्कस्य अन्यथाधूमोयदिवह्निमन्तरेणान्यतोनस्यात्तर्हिवह्नेरन्योनस्यादित्यादेरपितथात्वापत्तेः तथापर्यव
सायिनाचकचित्विशेषतोव्याप्त्यासामान्यतोव्याप्त्याकचित्पक्षधर्मताबलात्तत्संपत्तये अत्रवन्ह्यसंभवहितजन्यत्वेनपक्षो
विशेषणीयः विशेषणलोपस्थितेविशिष्टाभावबुद्धेः विशेष्याभावप्रयुक्तावलंबनात् तथोपस्थितिविरोधिचावह्नेरित्यादिशंका
दूषणप्रवेशनिरासनीयं वस्तुतोवन्ह्यसंभवधिवह्निसंभवहितजन्यंवन्ह्यसंभवहितजन्यंसंभवतीतिवह्निजन्यत्वपर्यवसितंवह्निसंभव
हितजन्यत्वंवाच्यं तथाचघटादौव्यभिचारवारणायापाद्यकोटिप्रतियोगिविशेषणार्थकंसत्यंतं अजन्येजन्येचनोक्तरीत्यावह्नि
केव्यभिचारवारणायजन्यइति तदर्थस्तुवन्ह्यसंभवधानकालीनवह्नित्संभवधानेतरयावत्कारणजन्यत्वंतथाविधयाव
त्कारणकत्वमितियावत् तथाचवन्ह्यसंभवहितजन्यत्वेसतिवन्ह्यसंभवधानकालीनवह्नित्संभवधानेतरयावत्कारण
कोनस्यादितिपर्यवसितोर्थः यत्तुनोक्तरीत्यावह्निकेव्यभिचारवारणायापाद्यकोटावेवविशेषणंसत्यंतार्थः सचवन्ह्यघटि
तसामग्र्यजन्यत्वमिति तन्न प्राक्तदसिद्धेः अत्रचाद्यदूषणंकाङ्क्षापतितपर्यवसिन्ना तृतीयापुनरापाद्यकाद्यप्रसिद्धिपर्यव
सायिनी अवह्नेः वह्निमूल्यात् तदुपादानमिति कारणमुक्त्यातदीयकार्यप्रयोजकताज्ञानपरं तादृशान्वयव्यतिरेकानुवि

श्रीगणपतयेनमः॥ ॐनमः सर्वभूतानिविष्टभ्यपरिनिष्ठते॥अखंडानंदबोधायपूर्णायपरमात्मने॥१॥ अध्ययनभावना
नाभ्यांसारंनिर्णयिनिर्वितनंत्राणां॥दीधितिमधिचिंतामणिगुरुनतनाकिकशिरोमणिःश्रीमान्॥२॥परजन्मदृष्टनयान्निवर्त
नानानननास्तादरसाविष्कृतबोधैः॥रघुनाथकवेरपतदोषाकृतिरेषाविदुषांतनोतुमोदं॥३॥ न्यायमधीतेसम्यक्
नुते कृतुकान्निबंधनप्यत्र॥अस्यतुकेनपरिहस्यंकेचनविज्ञातुमीशतेसुधियः॥४॥मान्यान्यागम्यविहितांजलिरप
भूयोभूयोविधायविनयंविनिवेदयामि॥दूष्यंवचोमनमपरंनिपुणंविभाव्यभावावबोधविहितोनधुनीतिदोषः॥५॥
पूर्वापरयष्पैकवाक्यतापतिपत्तयेशिष्याणांपदवाक्यन्यायसंगतिंप्रदर्शयन् अनुमाननिरूपणंप्रतिज्ञानीतिप्रत्यक्षावि
त्यादि अत्रोपजीव्योपजीवकभावः फलतश्चरूपतश्चप्रत्यक्षफलस्यानुमित्यनुव्यवसायादेः अनुमित्युपजीवकत्वे
पिनसर्वोप्रत्यक्षप्रमितिस्तथा अनुमितयस्तुसर्वाःसाक्षात्परंपरयावाव्याप्तिप्रत्यक्षोपजीविकाः पुरस्कृतश्चाय
मुपजीवकतोत्कर्षः यद्यपिसकलमेवप्रत्यक्षफलमुपजीवत्यदृष्टजननींसमवधानकृतव्यक्तापरिछेदिकामनुमितिं
ईश्वरप्रत्यक्षंतुनफलं तथापिदृष्टद्वारकं निरुक्तपातमादरणीयं इतरस्याविनिर्गलात् सदंचानुमितिक

रणानिंद्रिया पेक्षोत्पत्तिकं अनुमितिभावयन्तोपि ईश्वरज्ञानस्यतत्कारणानिर्याहकत्वासत्तिविरहेणातत्त्वात् सर्वे
पुनरिंद्रियंनानुमानाधीनजन्म मनःप्रत्यक्षणयोरजन्यत्वात् दृष्टद्वारा वातत्वमादरणीयं नचोत्पत्तिमदंपीद्रियंदृष्टद्वार
कमनुमानमपेक्षते अनोपजीव्यनिरूप्येवोपजीवकनिरूप्यतइतिनियमः क्वचित्कार्यनिरूप्यापिकारणनिरूपणा
दितिचेन्न किंचातः नहिसंगतिरनन्याभिधानव्यापा आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोवर्थः
संगतिः जायतेचकार्यकारणावज्ञातेकारणत्वस्यकार्यत्वस्यचज्ञानात्कमस्यकारणंकार्यंचेतिजिज्ञासा अतस्त
योर्द्वयोरेवसंगतित्वे इत्यंचोपजीवकतायास्तत्यत्वेनक्षतिरितिमन्तव्यं लाघवायात्रैवोपमानस्यसंगतिंदर्शय
तिवक्ष्यमाणानि सूत्राणिदूषयानिरसनीयान्यवादिविप्रतिपत्तिकत्वेनसूत्रपूरणायाचानुमानेएवव्युत्पित्सोःप्र
त्यभिज्ञासा नोपमाने अप्रसिद्धत्वात् निरसनीयबहुवादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च औत्सर्गिकीरी
तिमनुसृत्यवेदंतेनप्रत्यभिज्ञस्यचितद्गुरुहेजिज्ञासादर्थेपिनक्षतिः तथाचावसरसंगत्योपमाननिरूपणाभिप्रायः
यथाचावसरस्यसंगतित्वंतथोक्तमाकरे शास्त्रावसरसमयग्राहकंसप्रवृत्तिनिमित्तत्वबोधकसामान्यतोदृष्टअतीतो
अदृष्टजनकप्रवृत्तौपिकंचानुमानमपेक्षतेनिखिलमेवोपमानमितिहृदिधृत्वोपजीवत्वमेवसंगतिरित्यपिकेचित् ॥

संभवतीत्येवंनिरूपणयोरपि कार्यकारणभावः अथतत्पूर्वकमित्यादिसूत्रेतत्पूर्वकत्वेनानुमाननिरूपणात्तच्छब्देनव्या
प्त्यादिप्रत्यक्षपरामर्शादत्रापिसहचारप्रत्यक्षजन्यत्वादिनातन्निरूपणात्तत्प्रत्यक्षनिरूपणाधीनत्वात् एवमनुमान
भिन्नत्वेनोपमाननिरूपणानन्तरमनुमाननिरूपणापेक्षयातिसंक्षेपः तत्रलक्षणान्तरूपप्रामाण्यादिभिरनुमानेनि
रूपणीये करणस्यक्रियाभेदभिन्नमूर्तिकतयाक्रियालक्षणपूर्वकत्वलक्षणप्राह्यत्वासीत्यादिना अत्रव्याप्तिविशि
ष्टपक्षधर्मतोभयसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्मधारयोत्तरभावप्रत्ययस्यपदार्थनावच्छेदक
द्वयसामानाधिकरण्यचनत्वात् ज्ञानपदोपसंहारेणाबाधितासाधारणतज्ज्ञानलाभात्तनभ्रांतानुमित्यव्या
प्तिरित्याहुः तन्न परामर्शेनियमतोव्याप्तिविशिष्टत्यादिसामानाधिकरण्यप्रतीतेरभावात् गौरवेणतद्विषयकत्वे
नाहेतुत्वात् संबंधसंबंध्यहेपिविशिष्टज्ञानत्वस्यापपादितत्वात् भ्रमस्थलेतादृशसामानाधिकरण्यस्याप्रसिध्या
नज्ञानस्याप्यभावात् असत्यप्तिनिरासात् अवांतरवाक्यार्थायोग्यत्वनिर्णयेनहावाक्यार्थज्ञानानुदयात् विषाणीश
शसंबंधाभावनिश्चयदशायांशशविषाणजन्यनिदिध्यासुकर्मितिशब्दबुद्धेर्भ्रमत्वेपिदुरुपपादत्वात् मधात्रप्रमाण
प्रस्तोत्थमेवलक्ष्या यद्विचसल्लिंगकपरामर्शादपिभ्रांतानुमितिस्तद्यावत्प्रज्ञानपदंप्रमा परमिति कोच्य अव्याप्या

पक्षधर्मतोज्ञत्वावगाहिनापरामर्शेनजन्यितायांवक्तव्यःसाध्यवत्त्वज्ञावगाहितयाप्रमायामव्याप्तेःलिंगोपहितत्वेलैंगिकभान
निरासेनांशिकभ्रमत्वस्याप्ययोगात् ईश्वरतादृशज्ञानजन्यत्वस्यनतिप्रसंजकत्वात् अतएवव्याप्तिविशिष्टेपक्षधर्मतात
ज्ञानेवेत्यादिकमपास्तं यद्यपिव्याप्तिविशिष्टंनपक्षधर्मश्चेतिहदूह्यत्रयंणात् व्याप्तिविशिष्टत्वपक्षधर्मत्वावगाहिज्ञानजन्यत्वं
लभ्यते पदार्थयोरभेदेपिपदद्वयोपस्थाप्यत्वावच्छेदकभेदेनैवप्रमाणप्रमेयेत्यादिसूत्रेअन्यत्रचहूदस्यदर्शनात् पदार्थद्वयाभेदबो
धकात्समानाधिकरण्यादेर्दाभेदोदासीनपदार्थद्वयबोधजनकत्वेनेवहूदस्यभेदात् व्याप्तिविशिष्टपक्षधर्मतयावाव्या
प्तिविशिष्टत्वपक्षधर्मत्वयोर्लाभात् नचैवमालोकोवह्निव्याप्योधूमवान्पर्वतइतिज्ञानजन्येव्याप्तिः एकत्रतदुभया
वगाहित्वस्योक्तत्वादितिकेचित् तदप्यसत् एवमपिधूमोवह्निव्याप्योद्रव्यपर्वतइतीतिज्ञानजन्येतिप्रसंगात् एकरूपेण
तदुभयावगाहित्वस्योक्तौमीमांसकमतानुप्रवेशात् तन्निषेधस्तदुभयोपस्थेषावगाहितस्यचपरामर्शव्यापकत्वात् नचतदु
भयविशिष्टत्वनियतधर्मावच्छिन्नकारणतानियोगिककार्यताशालित्वमर्थः पक्षधर्मतोपादानवैयर्थ्यात् व्याप्तिवि
शिष्टव्याप्तिप्रकारकंयत्पक्षधर्मधीत्वज्ञानतज्जन्यमितितुस्यात् यद्यप्यत्रापीधूमसमानाधिकरणस्तादृभावप्रतियो
गितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणधूमवानित्यादिपरामर्शजन्येऽव्याप्तिः अखंडव्याप्तेरप्रसिद्धेः

अनुमितेर्लक्ष्यते चात्राकाशमात्मनइत्यादौ नितरांतथा तथापिताववस्तदार्थानांतथाविध परस्परोपश्लेषाचगाहित्व
मात्रंविवक्षितं नचव्यतिरेकिण्यव्याप्तिः व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्तेरनुगमात् भवति
हिधूमसमानाधिकरणात्यंताभावप्रतियोगिवह्निसमानाधिकरणाधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियो
गित्वेवाग्हीतेनियमतोव्यभिचारधीप्रतिरोधः तथाविधधूमसमानाधिकरणात्तादिकंतुनतथारासभादौतद्धेपिव्य
भिचारग्रहात् व्यतिरेकसहचारिणान्वयव्याप्तिग्रहणाश्रयेणाद्य नचभ्रमसंशयोत्तरप्रत्यक्षं प्रतिविशेषदर्शनेह्य
नुतापत्तेतत्रेति व्याप्तिः तथाविधनिश्चयत्वेन हेतुतायाःविवक्षितत्वात्तुपमितौनातिव्याप्तिः तथाविधवाक्यार्थप्रति
संधानत्वेनतस्य हेतुत्वात् नचोपनयार्थज्ञानजन्यन्यायार्थज्ञाने[illegible]तर्कहेतुसंकेतितशब्दांतरेणवाव्याप्तादिविशि
ष्टोपस्थितिद्वाराजनितशाब्दबोधेऽतिव्याप्तिः व्युत्पादयिष्यतेहिप्रकृतवाक्यार्थज्ञानस्यावांतरवाक्यार्थापेक्षीजन्यत्वेनतद्वा
देश्चविशेषरूपेणोपस्थापकत्वमितिवाच्यं नत्रानिरीक्षस्यपदजन्यत्वस्वीकारेणातावद्धेदकेनुपवेशान्निश्चयत्व
स्यचाप्रवेशाच्च नचतथापितत्तद्विशिष्टवैशिष्ट्यज्ञानंप्रतितत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनहेतुत्वात्

६ विशेषदर्शनस्यथर्मविशेषितेनतत्प्रत्युक्तं सात्रजातएव
हि

तादृशप्रत्यक्षेणाबोधेचेति व्याप्तिः रक्तोदंडोनवेतिसंशयेरक्तदंडवानयमितिज्ञानानुदयादितिवाच्यं ज्ञानोपरमे
पिविशिष्टविषयोपधानेनेच्छाद्वेषयोः क्षतेश्चसाक्षात्कारात् विशेषणविषयकाद्विशिष्टसंस्काराद्वविशिष्टस्मरणा
च्चतद्विषयकगुणज्ञानतत्रहेतुत्वेनन्यूनवृत्तिज्ञानत्वस्यापवेशादितः संस्काराच्चानुमितेरनुदयात्संस्काराद्यत्व छादि
स्यगुरुनयाज्ञानत्वेनैवतत्रहेतुत्वात् नचपरामर्शानुद्यवसायेऽतिव्याप्तिः सामान्यतः प्रत्यक्षेविषयत्वेननद्वि
षयकप्रत्यक्षेनत्वेन कदाचिन्नेज्ञानादिप्रत्यक्षेज्ञानत्वादिनातद्धेतुत्वेनतु [illegible] त्वादिविषयनिरोधप्रसं
गेननद्विषयकत्वेनचकार्यकारणभावः मैत्रावलोकितचैत्रनिष्ठनीलेनरूपेणघटनद्विषयकत्वादिनातत्वेऽननुकू
लकारणाभावप्रसंगात् प्रामाण्याच्चान्यथोपपत्तेश्च अपविशिष्टस्मरणेतिव्याप्तिः नचोपेक्षान्यत्वेनतत्रहे
तुत्वं उपेक्षात्वहिनजातिः चाक्षुषत्वादिनाजातिसंकरात् आंशिकत्वोपगमाच्च नापिप्रवृत्तिनिवृत्यजनकत्वं उ
पेक्षितविषयत्वेवा तादृशादपिस्मृत्युदयात् नापिसंस्काराजनकत्वं तज्जनकतावच्छेदकरूपांतरापरिचयात्
अन्योन्याश्रयप्रसंगाच्च संस्कारानुत्पत्तेरेवास्मरणसंभवे [illegible] तायांतदप्रवेशाच्च नाप्यनुभवत्वेनतथो

स्मृति

त्वसंस्कारस्यफलनाश्यत्वयासकृदनुभूतस्यस्मरणोत्तरमस्मरणप्रसंगात् समानाकारस्यैवफलनाश्यत्वात् सभू
हालंबनादिनोनैकैकगोचरकमिकस्मरणानुपपत्तिः जायतेचपुनःपुनःस्मरणात् दृढतरसंस्कारः परित्यज्यचनि
श्चितान्यभिचारंकरूपयतिप्रमाणव्यभिचारंकरणाकारणत्वकल्पनानुदयात् ददमेवाः समानाकारस्य हेतुतावच्छेदक
त्वबीजं अभिहितंचतात्पर्यटीकायांप्रथमसूत्रेऽवयवविवेचनेवाचस्पतिमिश्रैः स्मृतीनांस्वकार्यविरोधिनीना
मसहभावादिनियमेन चरमज्ञानपदस्यानुभवपरत्वात् साक्षात्तज्जन्यत्वेऽपिकल्पितत्वादिरपिकश्चित् किंच
व्याप्यविशेष्यकात्यक्षविशेष्यकाच्च परामर्शादनुमितिदर्शनात्तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेनतत्र हेतु
त्वलक्षणघटकमपितदेव एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात् अन्यथानियमेनस्मृ
तेरुभयविशेष्यकतापत्तेः समानप्रकारकत्वेनैवज्ञानस्मरणयोः कार्यकारणभावाच्चतत्रविशिष्टैवकार्यका
रणभावः नतूक्तरूपेणगौरवात् मानाभावाच्च एवंचविशिष्टवैशिष्ट्यबोधादेवकापिनानुप्रसक्तिशंकापि
वन्ह्याद्यनुमितौवन्ह्यादिव्यभिचारधीविरोधिधीविषयधर्मप्रकारकपक्षधर्मताज्ञानत्वेनहेतुतायांतेपिनित
रस्तएवलक्षणेपिनिवेशात् अतएवव्याप्यत्वत्यक्षादिभावयत्पदंव्याप्यवत्यक्षादिज्ञानत्वेन हेतुत्वेपिनक्षतिः

व्याप्यविषयकज्ञानजन्यज्ञानं विशेषणीयं एतेन स्मृतिप्रतिसंस्कारद्वारानुभवं प्रति चसाक्षाद्विशेषणाधि
यः हेतुत्वस्यनिर्विकल्पकात्मस्मरणस्यानुभवपूर्ववर्तित्वस्यहेतुत्वस्यनियमतश्चकृतिसाक्षात्कार पूर्व
विषयस्मृतेः कल्पनात् व्याप्यवत्पक्षत्वादिज्ञानेऽनुमितिव्याप्तिप्रतिपत्तेः साध्यादेर्ननुगमादेकोपादानेऽन्यानुमि
तीदंत्वाग्निविषयिण्यांचतस्यामव्याप्तिः परामर्षीभूयतेसापितादृशज्ञानवृत्तिअनुभवत्वव्याप्यजातिमत्त्वेविवक्षयानि
रसनीया एतत्स्वाभाव्याच्चानुभवार्थकंचरमज्ञानपदं एवंचान्वयव्यतिरेकव्याप्योः पृथक्प्रयोजकत्वेपिनक्षतिः पर्वतव
ह्नित्वाप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणतानिरूपितप्रतियोगिककार्यतायाः वह्नित्वाप्यवत्यवर्तिनिश्चयत्वावच्छिन्नकार
णतानिरूपितप्रतियोगिकव्याप्यविषयकवृत्तिकार्यतायांवाऽवच्छेदिकाज्ञानवृत्तिसामानाधिकरण्येनावच्छेदिकायाजातिस्तदुत्वंवो
ध्यं व्याप्तिभानेवश्यंभासमानोयस्तादृशानुमित्यविषयोयोधर्मस्तदविषयत्वमात्रंग्राह्यं क्वचिदनुमितिव्यक्तिमादा
यतच्चक्रिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वमनुमितित्वंवक्तव्यं अनुभवत्वजात्यनंगीकारेतुतच्च
क्रिसमवेतस्मरणासमवेतधर्मसमवायित्वंवक्तव्यं व्याप्तिज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकावच्छिन्ना

याविशिष्टपरामर्शोत्तरवह्निज्ञानाकारणतापतियोगिककार्यतानत्वमानाधिकरण्यानुभवत्वव्याप्यजातिमत्त्वेनत्वेनेत्यपि
केचित् परेत्वनुपलब्धमेतेत्यत्रपक्षतात्विशेषणंतथाचपक्षतासहकृततादृशपरामर्शजन्यत्वमर्थेःयथोक्तायाःविशे
व्याप्यभावरूपायाश्चापक्षतायाःप्रत्यक्षव्यावरणाद्यपरामर्शस्योपादानंतत्वेनजनकत्वमेकावच्छेदेनतदुभयजन्यत्वं
वविवक्षितंतेनबाधादिकालीनेनदेवात्प्रतियोगिविषयकेनपरामर्शेनजन्येपक्षतायाःप्रत्यक्षेतदुभयसमूहालंबने
वनातिव्याप्तिप्रसंगःतदर्थमनुभवत्वव्याप्यज्ञातिमत्त्वविवक्षयाचमाव्याप्तिरित्याहुः तच्चिंत्यं तत्करणेतिनेत्वव्याप्या
दिज्ञानजन्यज्ञानकरणत्वेनेतरभेदसाधनेव्याप्तिज्ञानत्वतादात्म्यसंबंधेनव्याप्तिज्ञानमेववाव्याहतंव्याप्तेरननुगमेपिज्ञ
धिकस्यभागासिद्धिवारणमात्रप्रयोजकत्वादितिवाच्यं फलोपहितस्यलक्ष्यतयाव्याप्तिज्ञानत्वादितिप्रसक्तत्वात् करण
त्वनिष्ठव्याप्तेस्तादृशज्ञानत्वत्वाघटकत्वात् व्यतिरेकव्याप्तेर्गगनकतयावैयर्थ्यशंकानवकाशाच्चेति लिंगस्यनित्यत्वेपि
अनुमितिकरणस्यचरूपतः प्रत्यक्षोपजीवकत्वेध्वस्यापयन्नाहतच्चेति अनुमितेर्ज्ञानाकरणकज्ञानत्वेनप्रत्यक्षप
मितिप्रध्वंसनिवेशात्तत्करणस्यापिप्रत्यक्षप्रमाणांतर्भावःस्यादितिनशिरस्यतितच्चेत्यपिकेचित् अनुमानस्यप्रामाण्यं ५

परीक्षितुं चार्वाकमतमनुस्मापयतिअथेति अनुमानं अनुमानत्वेनाभिमतं धूमादिज्ञानं अनुमानत्वेन
वा संवादेन संवादाभिमानेन संभावितस्यासतोनुगताकारस्यैवरूपस्यसत्त्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्लेखात्
अध्यक्षमूलकविकल्पोल्लिखितलक्षणद्वयसंवादः अनुमानाप्रामाण्येचतन्मूलकसम्यग्निर्णयाद्यधीनप्रवृत्तिकयोः शब्दो
पमानयोः स्वतएवाप्रामाण्यान्नाप्रत्यक्षप्रमाणमित्याहुरितीत्यादि अप्रमाणसाधर्म्येण प्रमाणतायोजकरूपशून्यत्वे
न दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्यवा मन्त्रादिहितप्रवेसाधर्म्यदर्शनसंभावनाभावयतिसंभावनैवच बहुशोव्यवहारे
नुगतिअतआहअनुमानमिति ननुनवयमापाततोभ्रमजनकत्वलक्षणाप्रामाण्यंनिरूपयामः येनभ्रमस्यविषयबा
धाधीनतयाप्रामाण्यंसंभाव्येत परंतुप्रमाकारणत्वव्यतिरेकमतआहअपिचेति स्वतइति नचानुगताकारास्यैवनील
रूपस्यसत्त्वलक्षणसाक्षिणास्वसंवेदनसंविदितप्रामाण्यनिर्विकल्पकज्ञानेनप्रामाण्यसंदिह्यते परंतुतदुत्तरभाविनिस
मुल्लिखितालीकानुगताकारसविकल्पकएवेतिवाच्यं निर्विकल्पकस्यसन्मात्रावलंबनत्वस्यविषयकत्वप्रामाण्यवगा
हित्वानोऽनुमानाधीनकत्वात् सर्वमिदंसतिव्याप्तिनिश्चयेसात्सएवतुनसंभवतिउपायाभावादित्याहव्याप्तीति

सिद्धि

समारभ्यानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादनिदानंव्याप्तिस्वरूपनिरूपणः ——— मारभते
नन्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्त्यतिसाध्यकसद्धेतावव्याप्तिमाशंक्याहसाध्यवच्छिन्नेति साध्यवच्छिन्नेयःसा
ध्याभावस्तद्वदवृत्तित्वमर्थः कर्मादौसंयोगाद्यभावस्यभिन्नत्वेनलाभाद्वाहसाध्यवदिति हेतोःसाध्यवत्यक्षभिन्नदृष्टांतवृ
त्तित्वेनाव्याप्तेराहसकलेति साकल्यंसाध्याभाववत्तिसाध्येबोध्यंसाध्याभावोवासाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोया
वः तेनविपक्षैकदेशनिष्ठाभावप्रतियोगिनिव्यभिचारिणिव्याप्तिः नवानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः अव्याप्य
व्याप्यवृत्ति वृत्तिसाध्यकसद्धेतावव्याप्तेर्व्यभिचारिणिचाव्याप्यवृत्तावतिव्याप्तेर्वारणायाभावद्वयेप्रतियोगिव्यधिकरणत्वबोध्यं हेत्व
भावोपिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणोबोध्यः तत्प्रतियोगित्वंचहेतुतावच्छेदकरूपेणबोध्यं तेन
द्रव्यत्वादौसाध्येविशिष्टसत्तादौनाव्याप्तिः नवाविशिष्टसत्तादिनातादृशाभावप्रतियोगिनिसत्तादावतिव्याप्तिः यत्रै
कव्यक्तिकंसाध्यंविपक्षोवातत्रनिरूढत्वादिव्याप्तेस्तेनसाध्यनिर्वाह्यत्वादौचाव्याप्तिस्तत्रहेत्वभावस्यवन्ह्यादेःप्रत्ये
कंयावद्विपक्षावृत्तित्वादतआहसाध्यवदिति अत्रान्योन्याभावस्यसाध्यवत्तावच्छिन्नप्रतियोगिताकत्वंव्युत्पत्तिवत्तत्रभ्यं ६

नहिभवतिनीलोघटोघटान्यइति नापीति साध्यसमानाधिकरणंयस्ययदधिकरणानधिकरणंसाध्यंतत्वं सा
ध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वं साध्यनिष्ठाधेयत्वनिरूपकाधिकरणवृत्तित्वनियतियावत् तदनधिकरणा
[illegible]त्यर्थः साध्यवद्भिन्नस्यचसाध्यनिष्ठाधेयत्वनिरूपकत्वान्नवृत्तौनातिप्रसंगः साध्यनिष्ठाधेयत्वनिरू
पकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकलमिति निष्कर्षः तेनसत्तायानद्रव्यत्वादित्यादौनदोषः
साध्यवेयधिकरणंसाध्यवद्भिन्नाधिकरणवृत्तित्वंचरमाधिकरणत्वांशस्यानतिप्रयोजनकतयातदपहायदूषयन्नाऽऽह
नूद्यदूषयतितदुभयमपीति साध्येत्यादिःसाध्यंयदधिकरणानधिकरणंतत्वाभावःसाध्यस्ययदनधिकरणंतद्वृत्तित्वाभा
वश्चार्थः तत्र केवलान्वयिनिसाध्यनिष्ठाधेयत्वनिरूपकाधिकरणप्रसिद्धा नानाव्यक्तिसाध्यकेचैकसाध्यव्यक्तिनि
ष्ठाधेयत्वनिरूपकत्वात्साधनाधिकरणव्यक्तेरस्त्यव्याप्तिः क्वचिद्व्यभिचारिण्यतिव्याप्तिश्चाद्ये द्वितीयेचसाध्यवै
यधिकरणंयदिसाध्यवत्तावच्छिन्नप्रतियोगिताकभेदोविवक्षितःतदाकेवलान्वयिनि यद्विचयत्किंचित्साध्यवद्व्यक्तिभे
दःतद्वानाधिकरणसाध्यकेसर्वत्राव्याप्तिः केचित्तुसाध्येति साध्यसामानाधिकरण्यंहेतुतावच्छेदकसंबंधेनहे

त्वधिकरणेतरेतरसंबंधेनसाध्यवद्वृत्तित्वस्याभावः तदधिकरणभिन्नत्वमर्थः तेनधूमस्यसाध्यवयवेसंयोगेन वह्निमतिचस
मवायेनावृत्तावपिनक्षतिः तादृशाभावश्चसंबंधांतरेणावर्त्तमानेसत्यलभ्यः व्यभिचारिण्यव्यभिचारिण्यरूपकाधिकरण
एवतत्तादृशतादृशाभाववत्वं सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यनियमभंगात् नचैवविशिष्टसत्वेऽव्याप्तिः विशि
ष्टस्यातिरिक्तत्वात् अनतिरिक्तत्वेवाविशेषणविशेष्यसंबंधस्यैवपरंपरयाव्याप्यत्वात् केवलान्वयिनिचाव्याप्यसमिधा
नद्वितीयलक्षणमिप्रमेयेणेत्याहुः तन्निरस्तं सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमितिप्रतीतिर्हिद्रव्यत्वगुणिनद्र
व्यवीत्वसामानाधिकरण्यमितिवत्तवत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंपरासंबंधेनसामानाधिक
रण्यस्यवाऽभावगुणेऽवगाहतेनतुसत्तायामेवद्रव्यवृत्तित्वाभावं सत्तानद्रव्यवृत्तित्वाभाववतीद्रव्यवृत्तित्वाभावोन
सत्तावृत्तिरित्यादिसर्वजनसिद्धप्रतीतिबाधितत्वात् बाधकाभावात्संयोगतदभावयोः [redacted]रवच्छेदकभेदेनएकत्रप्रती
त्यातदुभयोरेकत्रसिद्धिः अतींद्रियसाध्यकेऽतींद्रियव्यभिचारिणिव्यभिचारप्रसंगाच्च तत्रसामानाधिकरण्याभावस्य
प्रत्यक्षासंभवेनासिद्धेः नचतदभाववद्वृत्तित्वेनतत्रतदनुमेयं तद्वृत्तिभिन्नत्वस्योपाधित्वात् किंचदृष्टमिदानीमितिप्र
तीतिनियामकविशेषणतावच्छेदकतावच्छेदकसंबंधेनहेतुतासंसर्गेतावव्याप्तिः तेनसंबंधेनहेतुमतिकालेतेनसंबंधेनसाध्यवद्वृत्तित्वस्यवि

रहिणोऽप्रसिद्धेरिति समवायिनयेति वाच्यलंघयानसमवायित्वाद्येवक्ष्यते घटादिसमवायिनयेत्यर्थइत्याहुः प्रमे
यसाध्यकेचभावत्वेनाभावत्वानभावत्वेनभावानावच्छिन्नेनिवेन्द्रौऽप्रवृत्तिमात्रवृत्तिगगनत्वादिनाविरुद्धघटत्वपटत्वाभ्यां
नप्रमेयमात्रस्याभावःसत्त्वभः ननुपारिभाषिकमेवाव्याप्तिवारितंतथाहियत्समानाधिकरणाःसाध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकप्रतियोगिताकायावतोऽभावाःप्रतियोगिसमानाधिकरणास्तत्वसर्वत्रवाच्यत्वाद्यभावस्यतथात्वा
द्यावतोपादाने अतएवभूतत्वभूतत्वोभयवान्भूतत्वादित्यादौदिग्वाद्यवच्छिन्नाभावस्यप्रतियोगिसामानाधिकरण्येपिभू
तत्वमनोन्यत्वाद्यभावस्यातथात्वान्नातिप्रसगः साधनसमानाधिकरण गोत्वाद्यभावस्यतत्साध्यव्यधिकरणभावस्यवाऽस
तथात्वात्साध्यतावच्छेदकेत्यादि येनसंबंधेनहेतुस्तेनसंबंधेनतदधिकरणबोध्यंतेनात्मत्वेसाध्येसमवायेनहेतोर्ज्ञा
नस्यविषयतयाऽधिकरणेघटादौवर्तमानस्यसाध्याभावस्यातथात्वेपिनक्षतिः एवदलांतरेपिसंबंधभेदनिबंधनो
दोषःसंबंधैकविवक्षयानिरसनीयः रूपादिसामान्याभावेसाध्येपृथिवीत्वादिकंसद्धेतुरेवप्रत्ययपरमा णाकुत्यत्तिका
लेचावयविनितत्सत्वात् नचप्रतियोगिवत्ताध्वंसप्रागभावयोरप्यत्यंताभावविशेषित्वे मानाभावात् अतएवांतरालेर
क्तरूपनाशीतिप्रत्यक्षः नचेश्वरक्रियाध्वंसाश्रयगाहि पूर्वापररक्रियाध्वंसप्रागभाववतितदानींरक्तेपितथात्वप्रसं

गात् तत्समानाधिकरणंचत्वविशिष्टहेत्वधिकरणावच्छेदनबोध्यतेनगोत्वजन्यद्रव्यत्वप्रत्यायकृतित्वादिनावागवादेरभावस्य
नवाद्यनधिकरणध्यवच्छेदकतदृतिकालेभ्रहाकालेवावृत्तावधियदागोत्वतद्गोः यत्रकालत्वतत्रजन्यद्रव्यंप्रत्यायवृत्तित्वेत्या
दौनातिप्रसंगः हेतुमत्प्रत्ययेतत्समानाधिकरणाभावात् अविशिष्टेतिविशेषणात्कपिसंयोगाभाववान्नेयत्वादित्यादौ
संयोगाद्यन्यकस्यसाध्याभावस्यसकलहेत्वधि ॥३॥ वृत्तित्वेपिनाव्याप्तिः जलादिवृत्तित्वविशिष्टभावस्याभावस्तुजलत्वा गोत्वाद्य
द्यभावः नतुधूमाद्यभावः जलादावपितदभावप्रत्ययप्रसंगात्॥ यत्समानाधिकरणंसाध्यतावच्छेदकावच्छिन्नव्यापक
तावच्छेदकरूपावच्छिन्नप्रतियोगिताकानांयावद्भावानांप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यंतत्वात्तत्रेयत्वस्या
दिनाव्याप्त्यादीनामभावस्तुसुलभः शेषंदर्शितमिदृशमत्रवेयंयतस्तादृशप्रतियोग्यवृत्तित्वमिति॥ ॥केचित्तुव्याप्यवृत्तेर्हेतु
समानाधिकरणसाध्याभावस्यप्रतियोगितायाअननवच्छेदकं हेतुसमानाधिकरणस्यव्याप्यवृत्तेःप्रतियोगिव्यधिकरण
स्यवाअभावस्यप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकंयत्साध्यतावच्छेदकंतदवच्छिन्नसामानाधिकरण्येव्या
प्तिः एवंचव्याप्तेरव्यभिचारिसंबंधरूपतापिसंगच्छते हेतौसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैवसाध्यता
वच्छेदकेहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यापिव्यभिचारत्वात् अवच्छेदकत्वंचेहतत्सत्यासधिकरणत्वंतेनवि ८

शिष्टवस्तुभावस्यहेत्ववच्छेदेनोभयावच्छिन्नाभावस्यचप्रतियोगितावच्छेदकत्वेपिवह्नित्वस्यनक्षतिः सत्यवह्नित्वगुणादौसंयो
गाद्यभावेपिव्याप्यवृत्तिः यक्ष्यमाणंवास्तुप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेवतद्वच्छेदकत्वमिहापिबोध्यं भवतिच
गुणत्वगुणावृत्तित्वद्रव्यमात्रसमवेतत्वाच्चावच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरि
क्तवृत्तैवसंयोगत्वमित्याहुः॥ ॥साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यावच्छेदकत्वसमानाधिकरणसाध्या
भावत्वकत्वं यत्समानाधिकरणसाध्याभावप्रमायांसाध्यवत्ताज्ञानविरोधित्वंनास्तितत्वव्याप्तिरितिनयुक्तं सर्वत्रसा
ध्याभावपदहेयत्वात्॥ ॥यत्तुसाध्याभाववत्तिपक्षधर्मतोपकृत्तानुमितिविरोधित्वंनास्तितत्वव्याप्तिरिति तन्न अनुमित्स्य
विरोधित्वज्ञानस्यानुमितिहेतुत्वेसाध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधिनयाव्यभिचारिणअनिप्रसंगात्॥ ॥
केचित्तुयावंतःसाध्याभावाःप्रत्येकंतत्तत्सप्तमीतीयायेनतत्तदधिकरणवृत्तित्वाभावास्तत्तत्वं साक्षात्संबंधसमानाधिक
रणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतरत्वेन साध्याभावश्चपूर्वोक्तद्वितीयरीत्याप्रवेशनीयः व्याप्यवृत्तिश्च॥
प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यसमानाधिकरणोवा तेननानासाध्यव्यक्तीरव्याप्यवृत्तेर्वासाध्याभाववतिवृत्तावपि
हेतोर्नाव्याप्तिः तदुक्तवृत्तित्वाभावस्तुतत्तत्साध्याभाववद्वृत्तित्वव्यापकव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकोयाल्पः

नेनतत्साध्याभाववद्वृत्तिविरोधवृत्तित्वस्यधार्मिवत्तादिविशेषितस्यद्रव्यत्वादेश्चवह्निनस्यवासाध्याभाववद्वृत्तित्वस्याभाव
मादायनातिप्रसंगः अत्रच हेतुतावच्छेदकसंबंधेनसाध्याभाववद्वृत्तित्वंबोध्यं तेनयत्साभाववतिस्वाश्रयवेधूमस्यवृत्तावव
पिनदोषः दृश्यंचसाध्याभावोपि हेतुतावच्छेदकसंबंधेनकस्यचिदधिकरणेवर्तमानोग्राह्यः तेनजातिमान्सत्त्वादि
त्वादौ हेतुतावच्छेदकसंबंधेनसाध्याभाववद्वृत्तित्वस्याप्रसिद्धावपिनक्षतिः यद्यायावंतस्तादृशाःसाध्याभावाःप्रत्येकंते
षांसजातीयस्यव्यापकीभूतस्यव्याप्यवृत्तेरभावस्यप्रतियोगितावच्छेदकेनधर्मेणयद्रूपावच्छिन्नप्रतियोगिताकव्यापकत्वप्रव
च्छिन्नतद्रूपवत्त्वत्वं साधनस्यतादृशाभावप्रतियोगित्वंतद्रूपवच्छेदकत्वंवासाधनतावच्छेदकस्येतिनूतनवाच्यं द्रव्यस
त्वादित्वादौसत्तादेःतादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताकतादृशाभावप्रतियो
गित्वादतिव्याप्तेः नैयप्रमेयादित्वादौप्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वाद्व्याप्तेश्चप्रमेयत्वव्यधिकरण
यद्वा प्रतियोगित्वस्याप्रसिद्धेः यावंतस्तादृशाःसाध्याभावाःप्रत्येकंतत्प्रतियोगित्वावच्छेदकत्वेनधर्मेणयद्रूपावच्छिन्नप्र
तियोगिताकव्यापकत्वप्रवच्छिद्यतेतद्रूपवत्त्वंतत्प्रसिद्धमेवाहुः॥ ॥परेतुवृत्तिमद्वृत्तयोर्यावंतःसाध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं
व्याप्तिः येनसंबंधेनहेतुर्यत्रनवृत्तिमत्वमपिबोध्यं तेनव्यधिकरणधर्मावच्छिन्नाभाववत्तिसंयोगेनयावृत्तिस्तद्

भावस्यज्ञानादौ वर्त्तमानस्यधूमादावसत्वेपिनक्षतिः साध्याभावश्चपूर्ववद्बोध्यः तद्वृत्तित्वाभावोपिस्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वसत्वेव्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकोवाबोध्यः तेनालोकाद्यवृत्तित्वेनरूपेणयोवह्निसामान्याभाववद्वृत्तित्वस्यसंबंधत्वात्तद्वह्निसामान्याभाववद्वृत्तित्वस्यचहेत्वन्तरवृत्तेः स्वस्मिन्नसत्वेपिनक्षतिरित्याहुः॥ ॥अन्येतुवृत्तिमद्वृत्तयोयावंतेः साध्याभावसमुदायाधिकरणवृत्तित्वाभावात्तद्वत्तत्वे तादृशवृत्तित्वाभाववत्त्वंतादृशवृत्तित्वत्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताकोबोध्यः प्रयोजनंचोक्तप्रायं साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्यव्यधिकरणधर्मावच्छिन्नस्यैवाभावस्यवृत्तिमद्वृत्तित्वात्व्यभिचारिण्यतिव्याप्तेःसमुदायेति ॥ साध्याभावश्चसाध्यतावच्छेदकसंबंधेनबोध्यः तेनसमवायेनवन्हेःसाध्येधूमे संयोगेनचत्वत्पाषाणेवन्त्यावयवत्वेपर्वतवन्त्यावयवसंयोगेचपर्वतस्यवन्त्यावयवस्यचसंबंधद्वयावच्छिन्नवन्त्याभावद्वयानधिकरणत्वेपिनातिव्याप्तिः तथाचव्याप्यवृत्तीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोपितेनयत्रपृथिवीत्वाभावादौसाध्येतत्तद्धर्मिपक्षावृत्तिलाद्यवच्छिन्नप्रतियोगितात्वाभावकूटाधिकरणमप्रसिद्धंतत्रसंदेहो पृथिवीत्वादौसाध्येजातिलाद्यवच्छिन्नाभाववत्तासामान्याद्भाववत्तामानेद्व्यत्व

प्रकारकप्रमाविषयत्वादौ नाव्याप्तिरतिव्याप्तिर्वा साध्याभावत्वादिनाऽभावादौ साध्येऽतत्साध्याभावकूटाधिकरणाप्रसि
ध्याऽव्याप्तिरित्याहुः तन्न द्रव्यत्वपृथिवीत्वोभयकान्द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति गुणादौ द्रव्यत्वा
देर्वृत्तेरतिव्याप्तेः अपिच द्रव्यं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभाववत्कूटाधिकर
णगुणाद्यवृत्तित्वस्य द्रव्यत्वेसत्वादतिव्याप्तेः द्रव्यत्वत्वावच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसम
व्याप्तत्वात् किंचरूपाभावसाध्यकसद्धेतौसाध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः यावत्तादृभावा
नामेकाधिकरण्यं तावत्तासमुदायेविवक्षितेपृथिवीवृत्तिगुणभून्यसत्तान्यपृथिवीवृत्तिगुणभून्यंवा वायुत्वात्तरूप
वदन्यत्वाद्द्रव्यत्वादावतिव्याप्तिः तत्रतादृशसाध्याभावस्तोमस्यरूपादिघटितत्वेनतद्वृत्तिहेत्तोर्वृत्तेः वस्तुतोनिखिला
नामेवरूपाद्यनंतादृशाभावसहस्रसमानाधिकरणत्वात्समानाधिकरणयावद्भावाधिकरणाप्रसिद्धिर्दुर्वारैवेति
किंचहेतुतावच्छेदकसंबंधेनयासाध्याभाववत्तिवृत्तित्वंतदभावोवक्तव्यः अन्यथाधूमाभाववद्व्याप्तिः साध्यतावच्छेदकसंबं
धेनसाध्यस्याभाववत्तिकालाद्यवृत्तिमन्मात्रस्यैववृत्तेर्व्यभिचारित्वप्रसंगोवा तथाचसत्तादिसाध्यकेसंयोगेनसमवाये
नवाहेतावव्याप्तिः साध्याभाववत्तित्वेनसंबंधेनवृत्तेरप्रसिद्धेः साधनसमानाधिकरणत्वेनसाध्याभावोविशेषणीयइति

तिवैशिष्ट्यंतां तथापि भूतत्वमूर्तत्वाद्योरन्यतरत्वेनाभावेसाध्येस्पर्शवदन्यत्वादित्यादावतिव्याप्तिः तत्रतादृशसाध्याभावसमुदाय वृत्ति
वृत्तिर्व्याप्तेत्तस्याहेतेः किंचप्रहाकालान्यत्वादिसाध्यकेव्यभिचारिणिकालिकविशेषणताविशेषणघटादिहेतावतिव्याप्तिः तादृशसा
ध्याभावसमुदायवृत्तिप्रहाकालेतेनसंबंधेनवृत्तेप्रत्यात्रस्यैववृत्तेः॥ ॥एतेनसाध्यतावच्छेदकावच्छिन्नव्यापकत्वावच्छेदकरूपावच्छि
न्नप्रतियोगिताकव्याप्यवृत्तित्वसहितेनाधिकरणयावद्भावाधिकरणवृत्तित्वाभावावृत्तिप्रहृत्तयोर्यावत्तत्वेव्याप्तिः केवलान्वयिनः
संयोगाद्यभावस्याभावः संयोगादेर्नव्याप्यवृत्तयः सर्वसाध्यस्यगुणसामान्याभावोद्रव्यत्वा धिकरणेउत्पत्तिकालावच्छेदेनव
तेनानेनिनव्याप्यवृत्तिः उक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिध्यादिसंपादकाः पुनरभावानहेतुसमानाधिकरणाः उक्तस
मुदायाधिकरणवृत्तित्वतदभाववृत्तित्वादीनिपूर्वोक्तरीत्याप्रत्येतव्यानीत्यादिकमपास्तं॥ ॥ ॥नहिप्रहेतेर्विशेषणताव च्छे
दकविशिष्टज्ञानस्यविशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात्तदभावप्रत्ययोहिघटत्वादिविशिष्टघटादेःप्रतियोगित्वेनावगाहमानोविशेष
णस्यापिघटत्वादेःतदवच्छेदकत्वेनावगाहतेनस्वात्तत्रेणा घटोनास्तीत्येवप्रतीतेः तद्विहाभावप्रत्ययोयदिव्यधिकरणधर्मेणा
विशिष्टप्रतियोगिनंनावगाहतेनावगाहतएवतदात्तस्यापिप्रतियोगितावच्छेदकत्वे अथावगाहतेतर्हिभ्रमएवनत्वतोऽन्यथेति
धिरित्तिभावः यदिपुनरनुभविकलोकानांस्वरसवाहीघटत्वेनपटोनास्तीतिप्रत्ययस्तदात्तादृशाभावनिराकरणंगीर्वाणगुरुणाप्रश

साध्येति साध्यस्यासामानाधिकरण्येऽपीष्यते यावन्नधिकरणत्वंतदभाववद्वृत्तित्वमितियावत्तन्नास्ति नास्तिसाधिकरणंतदवच्छिन्नाधिकरणतात्वंसप्रतिप्रमाणाभावच्छेदकलाभात्तच्चैहान्यूनवृत्तित्व एवंचसाध्यवद्वृत्तिसकलपदार्थाभाववत्त्वंयदधिकरणतायाऽन्यूनवृत्तितत्प्रतियोगितावच्छेदकतात्पर्यं: यथासत्तिविशेषाधिकरणत्वस्यनवैयर्थ्यं हेतुतावच्छेदकसंबंधलाभायवातत्र येनयेनसंबंधेनयोयःसाध्यवद्वृत्तिस्तेनतेनसंबंधेनतत्तदभावोबोध्यः तेनसाध्यवद्वृत्तित्वंयदिसाध्यतावच्छेदकसंबंधेनविवक्षितंतदासमवायेनसाध्यतायांसाध्यवदसमवेतस्यसार्वत्रिकत्वात्सकलतदभावव्याप्तिसिद्धिः अथतदभावोतादृशेनैवसंबंधेनवाच्यःतदाजातिमान्नेयत्वादित्यादौवर्तिष्यामिःजातिमदसमवेतानांसमवायेनाभावस्यैकैवलान्वयित्वात् अतएवनसंयोगेनसमवायेनवा द्रव्यंनजातिमत्त्वजातित्वादित्यादौसाध्यवत्समवेताद्यप्रसिद्धेश्च नापिसाधनतावच्छेदकेनद्रव्येनद्रव्यभिन्नंगुणत्वादित्यादावतिव्याप्तेः नापिविषयतयाघटभिन्नंमेयत्वादित्यत्राप्यतिव्याप्तेः सविषयमात्रस्यैवघटभिन्नविषयकत्वात् घटनिर्विकल्पकेऽपिघटत्वादिभानात् नापिसंबंधमात्रेणद्रव्यंसत्त्वादित्यादावतिव्याप्तेः वृत्तिमन्मात्रस्यैवस्वरूपसंबंधेनप्रहाकालेवृत्तेः असतोरभावस्यैकैवलान्वयित्वाद्धिति प्रत्युक्तं विशेषणतात्विशेषणतावासाध्यवद्वृत्तित्वंवक्तव्यं सचवैवतत्तद्व्यक्तिरेवतत्तदन्योन्यंतत्यकारकप्रमाविषयत्वेवातत्सुलभं तेनैवसंबंधेनतदवच्छिन्न

सामान्याभावोवाच्यइति केचित्तन्न व्यत्यासेनप्रसाध्यनिसाध्यविरोधीनिसाध्यासमानाधिकरणानीतियावत्तन्निसामानाधिकरण्यनधि
करणनिष्ठत्वं साध्यसामानाधि[redacted]करण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्य[redacted]सामान्यकत्वमितिफलितार्थः
अत्रचसाध्यसामानाधिकरण्यंसाध्यतावच्छेकसंबंधेनसाध्यवतिहेतुतावच्छेदकसंबंधेनवृत्तिः परंचसामानाधिकरण्यंहेतुतावच्छे
दकसंबंधेनहेतुप्रतितेनैववृत्तिः तेनसमवायेनपृथिवीत्वादिःसाध्यतायांव्यभिचारिणिकालिकसंबंधेनहेतौ द्रव्यत्वादेस्समवा
येनसाध्यतायांसमवायेनहेतौसत्त्वगुणत्वादौनातिप्रसंगः नवासंयोगेनवत्वादौसाध्येसमवायेनतद्व्याप्यस्यरूपविशेषादेःका
लिकसंबंधेनापि करणकालेसंदग्धौचतत्परिमाणस्यसंदग्धत्वादेःसमवायेनतदधिकरणघटादेःसंयोगेनवृत्तावपिचाप्रसंगः
संबंधविशेषेणाव्याप्यत्वलाभायसाधिकरणत्वमित्याहुः तच्चिंत्यं यथाश्रुतव्याप्तिसंभवेविकल्प्यदूषयतिनेत्यादि नन्वप्रतियोगि
पदेनप्रतियोगितानवच्छेदकावच्छिन्नत्वंवक्तव्यमनन्याहद्रव्यत्वादेरिति प्रतियोगिविशेषितंतदधिकरणवृत्तित्वं व्याप्यवृत्तित्वं
स्वसमानाधिकरणात्यंताभावाप्रतियोगित्वं अधिकरणेति तथासत्यभावएवनसिध्येदितिभावः संयोगाद्यभावस्यचद्रव्येप्र
तियोगिसामानाधिकरण्यनव्याप्यवृत्तित्वंचप्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वेस्वाधिकरणीभूतद्रव्यनिष्ठात्यंताभावप्रति
योगित्वं गुणेचप्रतियोग्यसामानाधिकरण्यंव्याप्यवृत्तित्वंचप्रतियोग्यनधिकरणीभूतगुणवृत्तित्वंस्वाधिकरणीभूतगुण

निष्ठत्वंतुभावाप्रतियोगित्वं एतानिचनभेदकानिअविरोधात्सामान्यतश्चेव्याप्यवृत्तौप्रतियोगिसमानाधिकरणेचन
नस्यव्यतिरेकवृत्तिभावः ननुसाध्यवान्यस्येतिसाध्यवत्तिसंबंधोऽन्वेष्टव्यः सचाधिकरणत्वंसाध्यसाधनयोरविसामा
नाधिकरण्यमेवेत्यतोदूषणांतरमाहसाध्येति साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे यत्तूक्तमेववाप्तिर्नि
र्वक्तव्येत्यतआहवन्हिमदिति ननुयत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकंयदूपावच्छिन्नमवृत्तिदू
पावच्छिन्नेनसमंतस्यसामानाधिकरण्येव्याप्तिरित्यर्थः नचधूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको
वन्हित्वावच्छिन्नोवन्हिः धूमवान्वन्हिमान्नेत्यप्रतीतेरित्यतआहविशेषेति यएवप्रत्येकंवन्हिभेदेषुधूमसमानाधि
रणास्तएवैकाधिकरणवृत्तित्वावच्छिन्नावन्हिमत्सामान्यभेदबुद्धिमुत्पादयंतित्यप्रतियोगितावच्छेदकञ्चवन्हित्वाव
च्छिन्नोवन्हिरितिभवत्यव्याप्तिः साधनेति वैयधिकरण्यंतदनधिकरणवृत्तित्वंतच्चकेवलान्वयिनःसाध्यस्याप्रसि
द्धप्रतिप्रसंजकंचदृष्टविरुद्धव्यावृत्त्यादौऽतनःसमानाधिकरणोपादानं धूमादेरग्निनवन्त्यादिसमानाधिकरणद्रव्य

त्वाद्यनधिकरणवृत्तित्वमतोयावद्धीति यद्यपि पृथिवीत्वादिसमानाधिकरणघटत्वपटत्वाद्यनधिकरणवृत्तिर्द्रव्य
त्वादेः तदनधिकरणमात्रवृत्तित्वं चननिखिलघटपटादिरूपाणां तथापितादृशधर्मानधिकरणमात्रवृत्तित्वानवच्छेद
कसाध्यतावच्छेदकत्वं बोध्यं नहि पृथिवीत्वादिसमानाधिकरणः तादृशः कश्चिद्देकोधर्मोयदनधिकरणमात्रवृत्तित्वावच्छे
दकं रूपत्वादि धूमत्वादिकंवृक्षत्वादिसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तित्वावच्छेदकं तदवच्छेदकत्वंचत
दनतिरिक्तवृत्तित्वं तच्चतच्छून्यधर्मावृत्तित्वं तेनमेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्तित्वानधिकरणगग
नादिवृत्तित्वेपिद्रव्यत्वस्यद्रव्यसाध्यकमेयत्वेनातिप्रसंगः वस्तुतस्तुतादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरण
तावच्छेदकत्वंवाच्यंतेनसत्ताद्रव्यत्वोभयवान्गुणान्यत्वविशिष्टसत्तावान्वाजातित्वादित्यादौनातिप्रसंगः सत्ता
योगुणत्वाभावघटितमात्रवृत्तित्वविरहेपिउभयत्वावच्छिन्नाधिकरणतायागुणत्वाभावघटितमात्रवृत्तित्वात् प्रमेयत्वादेरिति ननु
व्यतिरेकिवेनधर्मोविशेषणीयः वस्तुतस्तुयावत्यदृतादृशस्यकस्यापिनवैयधिकरण्यावच्छेदकमेतावन्मात्रस्योरण्य
तथाचसाधनसमानाधिकरणधर्मनिरूपितवैयधिकरण्यावच्छेदकंयच्चतच्छिन्नधर्मवत्ता यावत्तादृशावच्छेदकत्वशून्य

धर्मवत्ताया साधनाधिकरण्यनियमे वक्तव्येऽतोऽन्यतरमाह महानसादाविति तथाचतदधिकरणत्वेतदभावाधिकरणत्वेतदुभयनिरूपितत्वं वाऽनयोर्दृष्टिसाध्यः एतेनतदधिकरणवृत्तित्वमात्रं वैयधिकरण्यनिरासाय तत्र हानस्य वृत्तित्वेवह्नेरभावात्तीतिप्रतीतेर्वह्न्वादेरपितादृवैयधिकरण्याधिकरणत्वात् संबंधविशेषणंवैयधिकरण्यविवक्षायां नोक्तदोषइतिध्येयं उपाधिपदस्यसाध्यसमव्यापकवचनतयाऽत्रास्त्रयप्रसंगादाहसाध्यव्यापकइत्यादि व्यापकत्वं व्याप्तिनिरूपकत्वंज्ञात्वास्त्रयादिग्रस्तमनसाहनद्वह्निरिति यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिकोवातत्रापिव्याप्यवृत्तिरवेऽभ्रांततस्तद्दृष्टिरित्यत्रप्रकारकप्रमाविषयत्वाभावादिरेवास्ति यदिचतस्यापि●विशेषणांतरविशिष्टस्यदृष्टत्वाद्यवह्नेस्यवातत्राभावसंभवस्तद्धसाध्यसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकीभूतसाधनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकधर्मवत्वंदलदृष्टार्थोबोध्यः अनवस्थानिरासायसाहप्रतियोगित्वमिति संहेति एकदेशकालावच्छेदेनेतिपूरणीयं तेननाव्याप्यवृत्तेरभावस्यप्रागभाव देश्चप्रतियोगितायामव्याप्तिः अन्योन्येति अत्रसमवायादिसंबंधावच्छिन्नप्रतियोगिताकाभाववत्तिमहानसादौसंयोगादिनावन्वादेर्वृत्तेर्यनसंबंधेनाभावस्तद्वृत्तिनेना

वृत्तिर्वक्तव्या इत्यत्रतेनसंबंधेनासंबद्धत्वोक्तौनायंदोषः अन्योन्याभावस्यतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वमात्रवृत्तित्वेन
संबंधेनप्रतियोगिनोऽसंबंधत्वात् परंतुसमायाःसमवायेनाभावप्रतियोगितायाव्याप्तेःतद्वृत्तिसमवायेनवृत्तेरप्रसिद्धेः ता
दृशसंबंधाधिकरणवृत्तित्वकथनेचव्यधिकरणसंबंधावच्छिन्नाभावप्रतियोगितायाव्याप्तेःसिद्धांतलक्षणवक्ष्य
माणरीत्याचखंडशःप्रसिध्यातत्परिहारोपिनिध्येयं उभावविरहस्तत्रनित्ये नचान्योन्याभावप्रतियोगितावच्छेदकयोरप्र
सक्त्यप्रसक्तौप्रकृतोपयोगिप्रतियोगितामात्रस्यलक्ष्यत्वेनुलक्षणेऽत्यंतपदवैयर्थ्ये सर्वत्रनित्यस्यनित्यसाधारणरूपावच्छि
न्नस्यवोपाधितासंभवात् इतरेपात्वभेदप्रतियोगितावारणायसंसर्गाभावपरतयातत्समर्पकलादितिवाद्यं विरहपदस्यतज्ज्ञानप्र
तिबंधकज्ञानविषयार्थकत्वात् प्रतिबध्नातिहितादात्म्येनप्रतियोगिज्ञानमन्योन्याभावबुद्धिं प्रतिबंधकत्वेचात्रैककालावच्छेदेनै
ककरणावर्तमानत्वं अभावपदस्यचस्वाभावपरत्वात् वस्तुतस्तुएकसंबंधावच्छिन्नायातत्समानाधिकरणाभावप्रतियोगितायाअ
नवच्छेदकमपिभवत्येवसंबंधोनरावच्छिन्नायातस्यावच्छेदकमतोयत्संबंधावच्छिन्नायासाध्यसमानाधिकरणाभावप्रतियोगितायाः
अनवच्छेदकतत्संबंधावच्छिन्नायाएवसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकतद्वाच्यंतथाचसंसर्गाभावत्वमनुपादेयमे
व यशोऽस्वरससूचनायसचव्यधिकरणसंबंधेनसर्वस्यप्रतियोगिनःतादृशभेदाभावात् स्वाभावसंबंधेस्वस्वाभावत्वा त

नविधयत्वयोर्व्यधिकरणयोः सर्वत्रसंभवित्वात् स्वाभावेत्यादौ षष्ठ्यर्थप्रतियोगितायाः पदेशक्तत्वरूपसंबंधस्यैवस्वीकरणीयत्वात्तस्यै
वात्रयुक्तत्वेनतथात्वौचित्यात् अभावत्वप्रतिबंधकत्वयोः प्रतियोगितानवच्छेदकत्वात् तथाविधव्यवहारविषयस्यापिविनाप्रतियोगि
तांनिर्वक्तुमशक्यत्वाच्च यत्समानाधिकरणसाध्यस्य तथाहीत्यादि यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं या २
वत्साध्यसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं साध्यसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकं या व
त्साधनसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकमित्यर्थोनोक्तदोषइतिध्येयं प्रतियोगितयोश्चैकसंबंधावच्छि
न्नत्वंविशेषणतावच्छिन्नसंबंधावच्छेदकतायांनेमप्रतियोगितावच्छेदकमात्रस्यैवयत्किंचित्संबंधावच्छिन्नसाध्यसमानाधि
करणात्यंताभावप्रतियोगितावच्छेदकत्वेपिएकसंबंधावच्छिन्नसाध्यसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकस्य
संबंधांतरावच्छिन्नसाधनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वेपिनक्षतिः व्यभिचारिणिवयत्राधिकरण्येव्यभिच
रोविशेषणतावच्छिन्नविशिष्टाभावप्रतियोगितावच्छेदकंसाध्यवत्वप्रकारकप्रमाविशेष्यत्वंविशेषणतावच्छि
न्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमितिनातिप्रसंगः वस्तुतोयत्समानाधिकरणान्योन्याभावप्रतियो
गितावच्छेदकंयावद्द्रव्यावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकंतद्द्रव्यावच्छिन्नसामानाधिकरण्ये साध्य १४

समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं यावद्यत्समानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं तत्सर्वं व्याप्रि
यतेऽयं साध्यमिति यावत्तावतेत्यर्थः दूषितं केवलान्वय्यप्रयोजकत्वेन साचर्यगौरवेण परमतिरिक्तवृत्ति ॥
कृत्स्नसाधनस्यसाध्यस्यसाध्याश्रयस्यसाध्यसमानाधिकरणस्यसाधनाश्रयस्यसाधनसमानाधिकरणस्यका ऽऽद्ये
कृत्स्नसाधनसमानाधिकरण्येसाध्येकृत्स्नेषुसाधनेषुसाध्यसमानाधिकरण्यंवार्थः प्रयोगेएकेतिनानेतिच वाप्रेम्ब्रा
हेतुवृत्तित्वे पृथिवीपृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तेश्च अतएवनेतरः अर्थाभिधानपूर्वकंद्वितीयंनिर
स्यतिअतएवेति अतएव एकव्यक्तिसाध्यकव्याप्तेरेव विशेषव्याप्तेः सप्रयोजनेपिचसंख्यापरिमाणादावेकत्वसाधने
सकलसाध्यसंबंधस्याभावात् भावश्चेश्वरवान्द्रव्यत्वादित्यादौ तृतीयेसाध्याश्रयमात्रवृत्तित्वं चतुर्थेचसाध्यसमानाधि
च करण्यावत्समानाधिकरण्यमर्थः तत्रैवप्रथमेसंभवेएकमात्रवृत्तिसाध्यके वह्न्यादौसाध्येधूमादावव्याप्तिः अतिव्याप्तिश्च
सत्त्वादौ अर्थपरिष्कारपूर्वकंपंचमंनिरस्यतिनचेति एकमात्रवृत्तिकेसाधनेचाव्याप्तिः तर्थैवषष्ठंनिरस्यतिनापीति ता
दृशानांसर्वेषांमहानसत्वादीनांप्रत्येकंनिरूपितान्यधिसमानाधिकरण्यानिनकुत्रापिवह्नौ अप्रयत्नोपस्थितसा

ध्यसामानाधिकरण्येनसाधनसामानाधिकरण्यव्यापकत्वेनतद्भावच्छिन्नसामानाधिकरण्यंविवक्षितमिति चेत् र
नोपित्यधुत्तरंसाधनव्यापकतावच्छेदकरूपावच्छे[redacted]त्रसामानाधिकरण्यमेवव्याप्तिरितिसिद्धांतयिष्यतइति अविने
ति साध्येविना साध्याभाववृत्तियोभावः वृत्तिः तद्विरहः साध्येविनाऽभावः साध्याभावव्यापकीभूताभावप्रतियोगि
त्वंवा अत्येति संबंधः सामानाधिकरण्ये व्यभिचारिसंबंधस्यकेनचित् किंचिद्रूपावच्छिन्नेन धूमादेरपिद्रव्यत्वादिना
वन्निव्यापकत्वात् तद्धूमादिति नचव्यभिचारग्रहसहकृततद्धूमस्तथा व्यभिचारतज्ज्ञानयोरनुपस्थितावपि
समानाधिकरणधर्मेणवत्ताज्ञानमात्रादनुमित्यनुत्पादस्यसर्वानुभवसिद्धत्वात् हेत्वंतरेतत्रैवचरस्यातरेणव्यभि
चारग्रहेहेतुतावच्छेदकांशेव्यनुमितेरुत्पादाच्च विवदंतेचसामानाधिकरण्यज्ञानमेवहेतुतायां व्यभिचारज्ञा
नाभावकारणत्वाभावेऽप्यचकारणीभूतसामानाधिकरण्यज्ञानेलाघवेनाव्यभिचारस्यैवविषयतयाऽवच्छेद
कत्वमुचितं नचाव्यभिचारसंशयेऽनुमित्यनुदयाद्व्यभिचारनिश्चयत्वेनकारणत्वौचित्यं व्यभिचारज्ञानस्य
भ्रमत्वनिश्चयदशायामेवानुमित्यविरोधितयाभ्रमत्वेनानिश्चिय्यमानस्यतस्यविरोधित्वंवाच्यं अचयव्यभि

चारनिश्चयस्यभ्रमत्वशंकायामप्यनुमित्यजनकतयाभ्रमत्वेनागृह्यमाणस्येवहेतुत्वमित्तिवैवगौरवान् नानाविध
व्यभिचारस्थलानाभावाज्जनियतपूर्ववृत्तित्वेनकुलालादेवहेतुत्वमपेक्ष्यवक्ष्यमाणैकविधाव्यभिचारस्थानस्यहेतुत्वेयुक्तमित्या
हुः सामान्याधिकरण्यविशिष्टपक्षधर्मत्वंतुपक्षेसाध्यग्रहंविनादुर्ग्रहमितिकेवलान्वयित्वस्याग्रहेसामान्याधिकरण्य
मात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहेपिवाच्यः तच्चवृत्तिमदत्यन्ताभावप्रतियोगित्वादिकं अन्योन्याभावप्रतियोगित्वादिकं दक
त्वंवातत्पाचसर्वसाधारण्यायलाघवात्साधनवतः तद्वृत्तित्वस्यवावृत्तेरन्योन्याभावस्यवाविशेषणत्वमुचितमिति सिद्धं
तरहस्यं शेषंकेवलान्वयिनिवक्ष्यामः॥ ॥ ॥प्रतियोग्यसमानाधिकरणेति॥ ॥प्रतियोग्यसमानाधिकरण
यद्रूपविशिष्टसमा नाधिकरणात्यन्ताभावप्रतियोगित्वानवच्छेदकोयोधर्मस्तद्रूपावच्छिन्नेनयेनकेनापिसंसामानाधिकरण्यं
तद्रूपविशिष्टस्यतद्रूपावच्छिन्नयावच्चिरूपिताध्याप्तिरित्यर्थः दंड्यादौसाध्येपरंपरासंबंधेदंडत्वादिकमेवसाध्यतावच्छेदकमस्तो
नाव्याप्तिः इत्थंचेद्द्रव्यंगुणाकर्मान्यत्वेसतिसत्ताद्रव्यादौसत्ताद्यधिकरणगुणनिष्ठात्यंताभावप्रतियोगित्वेपिद्रव्यत्वादेनो
व्याप्तिः साधनस्यविशिष्टसत्वादेर्गुणादावृत्तेः सामानाधिकरण्यभ्रमेणाभेदेपिनिरूपकतावच्छेदकस्यअधिकरणता

वच्छेदकत्वं चैकाश्रयप्रेरकं यत्किंचिद्धूमलादिविशिष्टव्यापकसामानाधिकरण्यस्यासभादिसाधारणत्वाद्धूमत्वादि
भिन्नतादृशसामानाधिकरण्यंतद्धूमत्वादिकं वाव्याप्तिः उभयाभिन्नद्वितीयाभिन्नेतिधीयं उभयकर्मसंयोगी
एतद्हस्तत्वादिसंग्रहायासमानाधिकरणांतं पदमुद्देसंयोगीद्रव्यत्वादित्यत्राव्याप्तिवारणायतत् संयोगस्यशाखा
वच्छेदेनवृक्षत्वावच्छेदेनसामान्याभावतौविरोधाभावात्तत्र चाद्रीद्रियसंयोगस्यापिसत्वात्परितःप्रतियोग्युप
लब्धेर्दोषाद्वृक्षेनसंयोगद्रव्यादिनाध्यस्तमिति तत्र द्रव्येसंयोगसामान्याभावेमानाभावात् नचयोयदीयावद्धिरो
षाभावावान्सनत्सामान्याभाववानितिव्याप्तेर्यावत्संयोगाभावएवमानं यत्तदर्थयोरनुगमात्तेएकावच्छेदे
नयावद्धिरोषाभाववत्तस्योपाधित्वाच्च एतेनायंसंयोगसामान्याभाववान्यावत्संयोगविशेषाभाववत्वादि
तियावत्तं व्यर्थविशेषणतात् उभयप्रयोजकत्वान्निर्गुणत्वा[illegible]धित्वाच्च नचप्रतियोग्यनवच्छेदकतयै
वदृक्षत्वादेरभावावच्छेदकत्वं गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसंगात् यथाचघटपूर्ववर्तित्व
स्यप्रतिदंडवन्निसामानाधिकरण्यस्यवाप्रतिधूमभिन्नत्वेपिदंडत्वंधूमत्ववात्तत्सामान्यस्यावच्छेदकं नथैवसंयोग

सामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापिस्ववचनाच्चेतिसंप्रदायः नवीनाः पुनरुत्पत्तिकालावच्छेदेनघटादौगुणस्यप्र
लयावच्छेदेनगगनादौसंयोगस्यसामान्याभावोवक्तव्यस्तथाधूमत्वत्यपिविरोहदहनस्यइहपर्वतेनित्यंवेहताशनःनसिध्य
दितिप्रतीतेःसंयोगेनद्रव्यस्याप्यव्याप्यवृत्तित्वात् वृत्तेरव्याप्यवृत्तित्वेवृत्तिमतोव्याप्यवृत्तित्वस्यात्यंतासंभवित्वाच्च एवं
प्रतियोगिनश्चौपाधिकालदेशयोर्देशकालभेदावच्छेदेनतदभावइतितत्तत्साध्यकाव्याप्तिवारणायतत्तत् नोपादेयंचसर्व
त्रैवव्याप्यवृत्तिसाध्यकेसाध्यभेदेनव्याप्तिभेदादितिवदंति प्रतियोग्यसामा नाधिकरण्यंचप्रतियोगितावच्छेदकावच्छि
न्नासामानाधिकरण्यं नेत्यायंगुणकर्मान्यत्वविशिष्टसत्तावान्जातिमत्वात् मूर्तत्वमूर्तत्वभेदवान्मूर्तत्वादित्यादौनाति
प्रसंगः नचोभयत्वमेकविशिष्टापरत्वविशिष्टंचकेवलादन्यदितितदभावोमनसिसहजतएवप्रतियोगिव्यधिकर ण
इतिवाच्यं तदुभयत्वहिनविशिष्टत्वादनतिरिक्तं नवातदवच्छिन्नाभावः तदवच्छिन्नाभावात् वैशिष्ट्यविरहेपिघटत्वपटत्वयो
रुभयत्वस्योभयत्वेनतदभावस्यप्रत्यक्षसिद्धत्वात् नचतत्रव्याप्तिरेवमुभयत्वाधिकरणस्यमूर्तत्वस्यमनसिसत्वादितिवा
च्यं तथात्वेप्युभयत्वेनरूपेणतत्रासत्वात् नात्रोभयमितिप्रतीतिर्दुर्वारत्वात् अत्यंताप्रसिद्धत्वात्यंताभावत्वनिरूपकप्रति

योग्यसामानाधिकरण्यस्यात्यंताभावत्वनिरूपकप्रतियोगितायाश्चलाभाय अन्यथासर्वस्यैवाभावस्यस्वसमानाधिकरणाभा
वांतरभिन्नत्वाभेदस्यस्वरूपानतिरिक्ततयाप्रतियोग्यसामानाधिकरण्यस्यदुर्लभतापत्तेः सर्वेषामेवाभावानांहेतुसमा
नाधिकरणात्यंताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणाभावांतरात्मकत्वभेदस्यप्रतियोगितादभा वसा
ध्यकार्य्यासंसर्गेतिसंप्रदायः अप्ययदागोत्वंतदागोरित्यत्रातिव्याप्तिःप्रलयस्यगोध्वंसवत्वेनगवात्यंताभावानधिकरणत्वात्
संसर्गाभावमात्रीक्रियियदास्यदृष्टंतदाद्व्यणुकंयदा■दृष्टंतदाजन्यंज्ञानंदृष्टंवायदानस्यादृष्टंतदातदीयंज्ञानमित्या
दावतिव्याप्तिः द्व्यणुकसादेर्द्व्यणुकादिप्रध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात् नहितयोःसामा
न्याभावत्वमतेपिएकविशेषप्रागभावविशेषांतरध्वंसयत्यपिसमयेसामान्यावच्छिन्नध्वंसप्रागभावयोःसंभवद्वृत्तित्वेन
प्रतियोगिमतद्वृत्तध्वंसादिमतोपिकालस्यात्यंताभाववत्वेपिविरोधाभावात् अन्यथाजन्यत्वाभावस्यकालमात्रावृत्तित्वेपसं
गात् द्रव्यात्तुविशेषः यदेकस्यदेशाभेदावच्छिन्नं तथात्वेनपरस्यतुस्वरूपावच्छिन्न■मिदंतेकालस्यैवकालेदेशस्या
प्यवच्छेदकत्वात् तच्छून्येचकालेतदभावस्यप्रतियोगिव्यधिकरणत्वात् नचसंसर्गाभावविशेषोजन्यत्वाभावः संसर्गाभा
वेचसंसर्गेपजन्यप्रतीतिविषयाभावत्वरूपंजन्यत्वाघटकनियमघटितमितिवाच्यं तद्द्रव्यावृत्तित्वरूपनियमस्यतत्र

घटकत्वात् एवंनियमांतरस्यात्रप्रवेशेपिनक्षतिरित्याहुः वक्ष्यतेचवियमा घटितप्रबंधसंसर्गाभावादिलक्षणं अनुपदमेवविवेचयिष्यतेसंसर्गाभावत्वनिवेशेप्रयोजनविरहोऽव्याप्तिश्च अपशब्दवान्द्रव्यत्वात्विशेषगुणवान्मनोन्यद्रव्यत्वात्जातिमान्भावत्वात्द्रव्यादौसमवायेनज्ञानादेःसाध्यत्वाभावेनव्याप्तिःसाध्यशून्यानाधिकरणहेतुमत्तोविषयत्वविशेषणत्वएकार्थसमवायेसाध्यत्वात् नैवं प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिनोघटादिकरणसंबंधिवात्तृत्तिलाभावस्योक्तत्वात् भवतिचैवमन्योन्याभावेपिप्रतियोग्यसमानाधिकरणः तद्विशिष्टस्यचहेत्वधिकरणवृत्तित्वंबोध्येननाव्याप्यवृत्तिसाध्यकसंग्रहः तद्वृत्तिभिन्नत्वेतुनार्थः अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसंगात् अत्रचसामानाधिकरण्यवतोननदभावत्वंप्रतीतेरन्यथोपपादितत्वात्तत्स्वरसात्यतियोगिवैयधिकरण्येत्यादि विशेषणंवक्ष्यति तच्चहेत्वधिकरणबोध्यं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावेतिपुनरर्थांतरनिष्कर्षः ननुप्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यचिन्नत्सामान्यस्यवाप्रतियोगितावच्छेदकंयत्किंचिन्नत्तदवच्छिन्नस्यवाऽनधिकरणत्वमुक्तं आद्येऽव्याप्यवृत्तिसाध्यकाव्याप्तिः एकप्रतियोग्यधिकरणस्यापिनत्तद्व्यक्तेरनधिकरणत्वात् द्वितीयेसंयोगसामान्याभावान्द्रव्यत्वाभाववान्वासंस्तादिस्यादवृत्ति

व्याप्तिः साध्याभाववतो द्रव्यस्यात्मत्वप्रतियोगिसंयोगविशेषाभाववत्त्वान्नित्यत्वा[redacted]द्विशिष्टद्रव्यत्वाभावात्मकप्रतियो
गिनोऽधिकरणत्वाच्चस्वाभावाभावात्मकस्य विशिष्टस्यापि द्रव्यत्वस्यद्रव्यत्वानतिरेकात् तृतीयेकपिसंयोगाभाववाना
त्मत्वादित्यादावव्याप्तिः साध्याभावानाकपिसंयोगानांगुणानामधिकरणस्याप्यात्मनस्तत्प्रतियोगितावच्छेदकगुण
सामान्याभावतावच्छिन्नाधिकरणत्वात् नैवं यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वं हेतुमत्तत्तादृशावच्छेदक
त्वस्योक्तत्वात् अत्रश्चाद्यसामानाधिकरण्ये हेतोर्यादृशसंबंधः प्रविष्टः तेनसंबंधेनयोहेतुमान्नतत्रवर्तमानत्वभाव
स्य साध्यस्यचेयादृशसंबंधः तत्संबंधावच्छिन्नायाश्चप्रतियोगितायाअनवच्छेदकत्वंबोध्यं तेनधूमसमवायिनिष्ठाभावस्यसं
योगावच्छिन्नप्रतियोगितायाः धूमसंयोगिनिष्ठाभावस्यचसमवायावच्छिन्नप्रतियोगितायाः अनवच्छेदकत्वेपिवह्नित्वस्यनक्ष
तिः यद्वासाध्यतावच्छेदकसंबंधेनप्रतियोग्यसंबंधित्वंहेतुमतोबोध्यं तथाचसंबंधेनैवप्रतियोगिता नविशेषणीया एवं
सत्येतेसामानाधिकरण्यदोसंबंधित्वंनिवेशनीयंनत्वधिकरणत्वं तथाचधर्मिणेपिव्यापकत्वंव्याप्यत्वंचनिवहति तथा
हितादात्म्यसंबंधेनधूमवत्तःसंबंधिनिमहानसेवर्तमानोयोऽन्योन्याभावस्तस्यतादात्म्यसंबंधावच्छिन्नायाप्रतियोगिता

तरनयच्छेदकवन्हिमत्तावच्छिन्नस्यवन्हिमत्तस्तादात्म्यसंबंधेनसंबंधिनिनहानसेधूमवत्तस्तादात्म्येनसंबंधित्वं एवं
धर्मिणोधर्म्यव्यापकत्वव्याप्यत्वबोध्ये ऽतएवजलादीनांपृथिवीत्वाभावव्याप्यत्वंतत्रैतत्रोक्तंसंगच्छते यथाचयादृशेन
संबंधेनहेतोर्व्याप्यताग्रहीतातादृशेनसंबंधेनतत्पक्षविशिष्टज्ञानेयादृशेनसंबंधेनचसाध्यस्यव्यापकत्वमवग
तंतादृशेनैवपक्षसाध्ययोःवैशिष्ट्यानुमितिः तेनसंयोगेनधूमावयवेनवापवेतेसमवायेनवन्हिधीः तत्रैवावगत
व्यापकतावटकसंबंधेनव्यापकस्याभावश्चहेतुग्रहीतव्याप्यतावटकसंबंधेनव्याप्यस्याभावःसिध्यति कपिसंयोगा
समवायेनवन्हिविरहिणिपर्वतेसंयोगेनसंयोगेनवावन्हिविरहिणस्तावयवेधूमःसमवायेननिवर्त्तते निव
र्त्ततेवसंयोगेनवन्हिविरहिणिस्तावयवेसंयोगेनेतिनियमोपपद्यते यथाचतादात्म्यसंबंधेनजलादीनांव्याप्य
त्वग्रहाद्व्यापकनिवृत्यातादात्म्येनैवतेषामभावःसिध्यतिसएवचान्योन्याभावः इत्यनेवतादात्म्यान्तरक्ष
णेस्वरूपयोरपिव्याप्तिनिश्चयइतिसंगच्छते ऽतएवगोत्वतावच्छेदकहृदयायां [redacted] यत्रसास्नादिःसागौरितितादा
त्म्येनगोर्व्यापकत्वग्रहेतादात्म्येनसास्नादिनागौः तात्म्येनगोव्यतिरिक्तश्चसास्नादिव्यतिरिक्तःसिध्यति एवंच

संयोगेनगगनादेरपिद्रव्यत्वव्याप्यत्वं दुरपनियमकसंयोगना त्रस्याभावप्रतियोगित्वावच्छेदकसंबंधस्तत्वेसाध्यत्वावच्छेदक
संबंधेनप्रतियोग्यसंबंधित्वनिधानेवा पृथिवीत्वाद्व्यापकत्वमपितद्भावेवर्तोपिपृथिव्यादेःसंयोगेनतत्संबंधित्वात् सिद्धिर
पितस्यतथैव नतुवृत्तिनियामकेनसंबंधेन तेनासंबद्धत्वात् अव्यापकत्वाच्च व्यक्तीभविष्यतिचेदमुपरिष्टात् मन्यदृव्यानि
रिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्यविशेषगुणत्वाविशेषगुणाव्याप्यवृत्तिकिमपियापकंनस्यात् स्यावच्छेदकसंबंधेनप्रतियो
गिनोऽसंबंधिनिकालेवर्त्तमानस्याभावस्यप्रतियोगित्वायोगात्संबंधावच्छिन्नत्वस्य तेनसंबंधेनयत्प्रतियोगिसंबंधित्वंतदन्यत्वस्य
चकालेऽसंभवात् मन्यतादृशसंबंधेन हेत्वधिकरणीभूतयत्किंचिद्द्रव्यवृत्तिप्रतियोगित्वावच्छेदकविशिष्टप्रतियोगिसामान्यक
त्वेयत्कथंतत्राचावृत्तिगगनात्यन्ताभावद्वारिकैवतथात्वसिद्धिः सत्ताधिकरणकर्मादोसमवायेनसत्तासामान्यस्यसंयोग
सामान्यस्यवाऽवृत्तेर्नातिप्रसंगः भूतत्वमूर्तत्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टादिकंतुनमनोगुणादिवृ
त्तिसंयोगसामान्येतुनकिंचिद्द्रव्यावृत्तीतिवाच्यं विशिष्टस्यानतिरिक्तवृत्तित्वात् समवायेनजातेःसाध्यत्वेनेयत्तावावृत्तित्वाप्सिः
जातिमन्निष्ठतादृशाभावप्रतियोगितायाःजातित्वेनावच्छेदात् जातिमत्त्वेचसमवायेनवर्त्तमानस्याप्रसिद्धत्वात् संयोगादिसा
ध्यकगुणकर्मान्यत्वादोऽनित्याप्सिश्च अद्रव्यत्वेहेतुमतिसमवायेनवृत्तेरप्रसिद्धेः द्रव्येचसंयोगादेरपिवृत्तेः नैवं साध्यता

यद्भेदकसंबंधसामान्येनिरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्रूपानुयोगिकत्वसामान्याभावाभाव स्य
विवक्षितस्यात् धूमसंयोगेहेत्वधिकरणायोगोलक[illegible]नुयोगिकत्वस्य चैत्रान्यत्वविशिष्टेनदंडसंयोगेदंडाधिकरणचै
त्रानुयोगिकत्वस्य गुणकर्मान्यत्वविशिष्टसत्तासमवायेचजात्यधिकरणगुण कर्मानुयोगिकत्वस्यविरहाच्चातिप्रसंगः स्वरू
पसंबंधेनगगनादेर्वृत्तिमत्वेतुनिरुक्तप्रतियो[illegible]ग्यनधिकरणहेत्वधिकरणाभावप्रतियोगितासामान्येयत्संबंधावच्छिन्नत्वयद्धर्मा
वच्छिन्नत्वाभावाभावस्तेनसंबंधेनतद्धर्मावच्छिन्नस्यव्यापकत्वंबोध्यं समवायसंबंधेनमेयसामान्या[illegible]भावस्यसामान्या[illegible]दोस
त्यप्रमेयत्वादेरप्यभावप्रतियोगित्वावच्छेदकत्वस्यलभं अतएवसमवायस्यैकत्वेनद्रव्यत्वादिप्रतियोगित्वगुणाद्यनुयोगित्वोभ
यत्वेपिद्रव्यंवह्नेरित्यादौ वह्निधूमोभयवान्नेरित्यादौसंयोगस्यद्वित्वावच्छिन्नप्रतियोगिताकत्वविरहेपिचनानित्याग्निरित्यपि
नि वह्नेति प्रतियोगित्वादिरूपसंबंधविशेषःनसंबंधित्वेनैवनिष्ठः सामानाधिकरण्येपिसंबंधःसंयोगत्वादिनैवनिरूप्यते दृष्टांतेच
नियमाघ[illegible]टितमपिसंबंधत्वं अभावत्वंचेदनिरूपनात्तिद्वदभिदंनभवतीत्यादिप्रतीतिनियामकोभावाभावसाधारणस्वरू
पसंबंधविशेषःअतोनाभावसाध्यकव्यभिचारित्वप्रसंगः नहपिनोपादेयंत्व[illegible] प्रयोजनाभावात् विषयतात्वादिवत्

प्रतियोगित्वाधिकरणत्वसंबंधत्वादयोव्याप्तिरिक्तावयवदार्थाइत्यप्येकदेशिनः॥ ॥नन्वावच्छेदकत्वनिरूपितस्वरूपसंबंधवि
शेषः॥ वह्निलक्षणधर्मेगुरुनदभावात् प्रमेयधूमत्वकंबुग्रीवादिमत्त्वघटगतगुरुत्वादेस्तथात्वेनतीक्ष्णत्वेनसाध्यतायां
व्यभिचा रिण्यतिव्याप्तेः नाप्यनतिरिक्तवृत्तित्वं प्रतियोगितायाःस्वरूपसंबंधात्मिकायाः प्रतियक्तिभेदेनधूमत्वादेर
पिनदनतिरिक्तवृत्तित्वात् नचतथाविधयत्किंचिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वात् अनवयवानतिरिक्तसामान्या
भावस्याभावेधूमत्वादेरपिअनवच्छेदकत्वापातात् अथेतत्साधनमपिसंगच्छतइतिवाच्यं वह्निघटवृत्तिद्वित्वसामानाधिक
दहनवृत्तिद्वित्वावच्छिन्नप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादावतिप्रसंगात् स्तेनान्यूनवृत्तित्वविशेषितमपि [redacted] परस्तं
अनवयवनानाप्रतियोगिकस्यैकप्रतियोगितांगीकारेपिननिस्तार इति लघुरूपसमनियतगुरुरूपेणसाध्यतांसद्धेतावव्याप्तिः
नादृष्टादवह्निनत्वप्रसिद्धेरितिचेन्न प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्यविवक्षितत्वात् स्वसमानवृत्तिकंचावच्छेद
कंयात्वत्वंचस्वपर्याप्यधिकरणपर्याप्तवृत्तिकत्वंयावत्वादिकंतुनतथा पर्याप्तिश्चायमेकोघटः इदमौदुम्बरमितिप्रतीतिसाक्षि
कसंबंधविशेषएव त्रित्वादिकमपिनद्वित्वादिसमानवृत्तिकमितिद्वित्वादिनासाध्यतायांनाव्याप्तिः घटकंचावच्छेदकत्वंस्वरू
पसंबंधविशेषः एवंचपागुक्तेयदुभावच्छिन्नत्वेत्यत्रयदुभान्यूनवृत्तिधर्मावच्छिन्नत्वेतिवक्तव्यंतेनोक्तावाप्तिनिरासः वस्तुतस्तु २०

तदवच्छिन्नप्रतियोगिताकाभाववदसंबद्धत्वविशिष्टसामान्यकूटत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकतावान्हृद
तिरिक्तवृत्तित्वं वक्तव्यं तावद्वह्नसत्तावान्जातेरित्याद्यौजातिमत्निष्ठाभावप्रतियोगिता वच्छेदकगुणकर्मान्यत्वविशिष्टसत्तात्वा
त्यवृत्तिकत्वेपिसत्तात्वस्यनक्षतिः एवंस्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेदत्वंवाच्यं तादृशप्रतियोगितास्व
विशिष्योपादेयाः नातोगुरोरवच्छेदकत्वविरोधः द्रव्यत्वंप्रतियोगित्वसंबंधित्वंचसाध्यतावच्छेदकसंबंधेनबोध्यंतेनसंबं
धभेदान्नादोषः कालिकविशेषणतादिशेषेणसाध्यतायांचतादृशप्रतियोगिताया वच्छेदकत्वेऽनित्यत्वनद्यक्तित्वेपसि
द्धेऽभावेप्रतियोगिव्यधिकरणोबोध्यः मत्वमीलभिदमीयंचप्रतियोगिवैयधिकरण्यमनुपादेयं संयोगतावच्छि
न्नाभाववत्तिसंयोगत्वादिविशिष्टस्यवृत्तेः गुणादिनिष्ठाभावप्रतियोगिता वच्छेदकद्रव्यत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभा
ववत्तिचावृत्तेर्व्याप्तत्वाद्व्याप्तेरसंभवकाणादितिवाच्यं धूमवान्वह्नेरित्याद्यावत्तिव्याप्तिः नत्वत्यंतिकालावच्छेदेनाग्नियमहानसा
दौकिंचित्संयोगेनवर्त्तते येनवह्निमद्ययोगोलकनिष्ठअत्यंताभावप्रतियोगिता वच्छेदकायोगोलकावृत्तिद्रव्यत्वावच्छिन्ना
भाववद्वृत्तित्वंधूमवत्वविशिष्टस्यसंभाव्येत प्रतियोगितयोरेकसंबंधावच्छिन्नत्वस्यविशेषणतादिशेषावच्छिन्नत्वस्यवाविवक्ष
णेतु पुनरनुपादेयमेवप्रतियोगिवैयधिकरण्यद्वयं यत्राधिकरणेव्यभिचारः तद्भिन्नत्वत्वत्यंताभावकप्रमाविषयत्वत्वसा

ध्यवत्त्वप्रकारकप्रमाविषयत्वादीनांसाध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकत्वात् हेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चाव्याप्तेरनवकाशात् नचाव्यविशेषणतायाविशेष्यावच्छिन्नेऽदुष्टविशिष्टसंबंधिनिष्ठाभावप्रतियोगिता नवच्छेदकावच्छेदकसंबंधावच्छिन्नसाधनसमानाधिकरणात्यंताभावप्रतियोगितासामान्येनासिद्धेरनुमितिविशिष्टसामानाधिकरण्यव्याप्तिरितिपर्यवसितोऽर्थः मत्रसंदेहनुविशेषसाध्यतावच्छेदकं नप्रतियोगितावच्छेदकंनत्रैवेयंरीतिरुपादेयेत्यपिवदंति गौरवप्रतिसंधानदशायामपिकंबुग्रीवादिमान्नास्तीत्यादिप्रतीतिर्गुरुरपिधर्मोऽवच्छेदकः प्रतियोगितायाः नचास्यात्यंतियोगिकाभावमात्रप्रवलेबनतथाविधयत्किंचित्यंतियोगिसत्वेऽवनादृशप्रतीतिरनुदयात् अतएवैकघटवत्तिभूतलेकंबुग्रीवादिमान्नास्तीतिज्ञानप्रमाणं प्रमाणं घटसाम्यस्थले नचेदेवं लघुसमनियतानांगुरुणांसाध्यव्यक्तिनापत्तिः गुणादिगुणकर्मान्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाःप्रतियोगितायाःलाघवेनद्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेनैवावच्छेदात् तत्तद्व्यक्तीनांचप्रत्येकरूपेणाभावानांयुगसहस्रेणापिज्ञातुमशक्यत्वात् एवंद्रव्यत्वादिविशिष्टद्रव्यत्वादेरव्याप्यत्वापत्तिरप्यनुसंधेयः उपदर्शितप्रकारेणमयिस्वतोऽधिष्ठितेनेनदुर्ज्ञेयत्वात्॰

अनाश्रयत्वापत्तेः। द्रव्यत्वादेर्व्यभिचारित्वमपि साधूपसंगृहीतत्वादित्यपि केचित्। तन्न। नन्वयं वह्निलिङ्गको वह्न्यभावाद्धदाद्यौ वह्निर्नास्तीति धियं जनयति। तत्र प्रत्येकं धूमवत्त्वमहानसाद्यौ वर्तते। तत्र चैतेषां स्वस्ववह्नेर्दहनत्वद्रव्यत्वावच्छिन्नवैयधिकरण्यनिरूपकाः याः प्रतियोगितास्तदवच्छेदकमेव वह्नित्वमतोऽव्याप्तिः। नचैवं वह्नित्वावच्छिन्नस्य तद्वृत्तित्वान्न तथात्वं तथा सति हृद्वृत्तिधूमाभावप्रतियोगितावच्छेदकहृदवृत्तित्वावच्छिन्नस्य वह्नित्वस्य योगोलकवृत्तित्वादतिव्याप्त्यापत्तेः। अप्रामाणिकरूपपरित्यागाद्धूमाभावप्रतियोगितानानावच्छेदकमेव तत्तद्धूमाभावप्रतियोगितायाः अभावान्तरेऽनाभावात्। तथा च तद्रूपावच्छिन्नसाध्यकेऽपि व्यभिचारेऽव्याप्तिरतआह सामान्येति। संशयाद्यनुपपत्तिप्रमाणायत्तिज्ञान्यथेति। कथमिति यद्यप्ययं संशयोनवायुविशेष्यकः तस्यविशेषणत्वेनोल्लेखान्न नवाद्रव्यविशेष्यकः तथापि निरूपितद्धर्मयोः विरोधिनोरकोटिनायांप्रकृतानुपयोगप्रसंगात्। तथापि वायूरूपयान्। तद्धर्मावच्छेदेनिरूपितद्धर्मकोटिकसंशयेतात्पर्यं। अन्यस्तुरूप्यवत्तद्धर्म्याभावकोटिकइतिनाभेदइतिसंप्रदायविदः। विरुद्धयोरेकधर्मिसंबंधावगाहिज्ञानमेवसंशयः। नतुतद्भयप्रकारतायांनियन्तातथाचरूप्यत्तद्धर्मविशेष्यकोवायु

विशेषणकोसावित्तिसमा : वायुवृत्तित्वतद्भावकोटिकोरूपधर्मिकएवायंसंशयः अधिकरणवृत्तित्वसंशय
स्यापितत्रतद्धिकरणवृत्तित्वसंशयविरोधित्वात् अन्यथाभूतलेघटतद्भावान्यतर निर्णयेपिघटोभूतलवृत्तिनेवेतिसंशय
प्रसंगादित्यपरे अपरेतावत्त्वेवरूपाणिद्रव्यनिर्णयात्तयावद्रूपाभावनिर्णयेसंशयोनविरुध्यद्रव्यत्वेन यावद्रूपाभावनि
र्णय इत्यस्यया वतोरूपाभावा : तेषां यावत्त्वेननेषां यावंतिरूपाणि शिलावद्भावानां यावद्रूपत्वेनतद्भावानां वानिर्णय इत्यर्थः तत्रन
प्रथमतृतीयौतथानिर्णीतत्वात् नेतरौ प्रतियोगितद्भावयोर्यावत्त्वानुल्लेखेपियोग्यानुपलब्ध्याभूतलेघटोनास्तीतिनिश्चयभाजा
दैवघटतद्भावसंशयोछेददर्शनेनतस्याकिंचित्करत्वात् नचातिरिक्तसंभावनाविरहसहकृतएवाभावनिश्चयः तत्यतिबंधकः
संभावनाचरूपेपार्थिवादित्वेनयभिन्नेनवेत्याकारकानिवर्तेचेयंरूपत्वावच्छेदेनेतत्रित्वेनयभिन्नत्वाभावनिश्चयादेवेतिवाच्यं गौर
वात् विनाप्यतिरिक्तसंभावनांविशेषाभावनिश्चयेसामान्यसंशयदर्शनाच्च अत्याभावस्यसामान्याव च्छिन्नप्रतियोगिताकत्वनि
श्चयएवतादृशसंशयविरोधिअन्यथानाप्यतिप्रसंगात् सचनपुनस्ते अभावस्यचयावद्विशेषाभावाधिकरणवृत्तित्वावि
शिष्टस्यतद्यच्छेदेनकसामान्याव च्छिन्नप्रतियोगिताकत्वे संभवतिचेदं तादृशप्रतियोगितायाअतिरिक्तत्वात् तेननैकविशेष
वतोविशेषांतराभाववत्तेनसान्याभाववत्वप्रसंगः नचप्रतियोगितावच्छेदकभेदस्याभावभेदनियामकत्वान्भेदसिद्धिः प्रतियोगि

भेदस्यानन्तत्वेऽपि घटप्रतियोगिकस्य प्रागभावादिचतुष्कस्याभेदप्रसंगात् । अवच्छेदकानुपनिबन्धनत्वे तत्र क्वचित्तादात्म्यस्य क्वचि
त्संसर्गस्य क्वचित्पूर्वापरकालीनतद्ध्वंसादेश्चतथात्वादिति वाच्यं संसर्गप्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकत्व
स्यदुर्वचत्वात् पूर्वापरकालीनत्वादेश्चध्वंसादिप्रतियोगिनावच्छेदकत्वे प्रमाणाभावाच्च किंचावच्छेदकभेदस्याभावभेदनि
यामकत्वेनानुगतैकत्वेऽत्यन्ताभावादिस्वरूपस्यानुगतस्याजन्यत्वात् नापितद्व्याप्यत्वं वैयधिकरण्यात् अनन्यवृत्तेश्चाघ... कत्व त
मपि अभेदेऽप्यविरोधाच्च । अन्यतरधर्मावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वेस्यव्याप्यं ... मानाभावात्
अतएवसमनियतसुखदुःखादिसंख्यापरिमाणव्यक्त्यादिनानाधर्मावच्छिन्नोऽप्यभिन्नएवाभावः भेदसिद्धिस्तुभावधर्द
भावस्यापिविरुद्धधर्माध्यासादेव अतएवचागमनादीनामवृत्तिनांसमनियतानांचधर्माणामेकएवात्यन्ताभावः युगपद्वि
नेष्टानामनुत्पन्नानांवासमदेशानामसत्तिवाचकेएकएवध्वंसः प्रागभावोवेत्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽप्य
भावः प्रामाणिकश्चेत्तदानीमेकस्यैवप्रतियोगिताः सर्वैरेवव्यधिकरणैर्धर्मैः सर्वैरेवसमानाधिकरणैः संबंधैरवच्छिन्नं
तां आकाशाभावएववातथास्तामिति मैवं एवंहितत्तद्देशकालाद्यवच्छिन्नानवच्छिन्नतद्वृत्तिकरणवृत्तित्वेनविशिष्ट
स्यतत्तदवच्छेदेनवाएकस्यैवाभावस्यघटपटगोत्वाश्वत्वादिप्रतियोगिकत्वसंभवेनभेदोपिवित्युप्येत तत्रात्यन्ति

योगिकत्वं तु तत्तत्स्वभावैकनिबन्धनाधिकरणविशेषवृत्तित्वस्यातीन्द्रियस्य तत्तद्भेदकत्वं वेति तु पक्षे तेषु तत्तद्भेदेषु
न्यावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि वक्तुं शक्यम् अव्याप्तज्यवृत्तेस्तत्स्वभावस्यैतत्कल्पानुपपत्तेः अतिरिक्तकल्पने
चकिमपराद्धमतिरिक्तेनाभावेन किंचिद्व्यधिकरणयोः घटपटयोर्हि त्वयतीतिवत् व्यधिकरणनामपि विशेषाभावा
युगपद्दृष्टियसंनिकर्षसामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोपपत्तेः अपि च रूपान्तरेणसंबंधविधयाव्याप्यज्य
वृत्तिधर्मस्यज्ञानेनयावदाश्रयसंनिकर्षापेक्षा नानाभावात् एवं चैकाभावसंनिकर्षेणसामान्याभावबुद्धिप्रसंगः याद
शेत्वतस्यज्ञानेयावदाश्रयसंनिकर्षापेक्षातेतत्तेषांतद्भेदस्यज्ञानमपितद्ज्ञानेतद्भेदज्ञानेचतद्गृहीतआश्रय
भेदअपेक्षणात्तद्ग्रहदर्शनाच्च अथात्रयावद्विशेषाभावानांप्रत्यभिज्ञयास्थितिःसंभवति तत्तत्प्रतियोगिनांविशेषतोऽनु
पस्थितेरितिचेन्न केवलानेतविशेषाभावानांसामान्यावच्छिन्नप्रतियोगिताकत्वस्यतद्व्यासज्यवृत्तित्वस्यकल्पनाप
रेष्वल्पलाघवात्सामान्यावच्छिन्नप्रतियोगिताकत्वेनैकएवाभावोभावः कल्प्यते कल्पनीयप्रयोजकस्योभयत्रैवाविशेषात्तद्पेक्ष
तस्यगुरुत्वात् विनिगमनाभावेपिचसामान्याभावसिद्धिरप्रत्यूहैव धर्मकल्पनातोधर्मिकल्पनायांगुरुत्वकल्पनीया
नेकत्वप्रयुक्तं मध्यतिरिक्ताभावस्यतत्रचसामान्यावच्छिन्नप्रतियोगिताकत्वस्यजनेतव्यावच्यधिकरणवृत्तित्वस्यकल्प

नाभ पेक्ष्य कु ज्ञानेनाधि करण वृत्तिर्नांया वह्नि शेषाभावानामेवसामान्याव च्छिन्न प्रतियोगिताक त्वस्यैव ज्ञानज्य वृत्तित्वस्य च कल्प
नैव लघीय सीति वाच्यं एवंसत्यभावमात्रसिद्धि प्रसंगाद्दित्याकु ः॥ ॥अहेत्यादि अथात्रनानाव्यक्तिरूपादिसाध्यकैक व्यक्ति ए
थिवीत्वादावव्याप्तिः नचतत्रपृथ्वत्वादिकमेवसाध्यंतथापरंपरासंबंधेनपृथ्वत्वादिकमेवतेनसंबंधेननेतदभावः पृथिव्यादावि
तिवाच्यं रूपादेरसाध्यतापत्तेः द्रव्यान्यत्वविशिष्टसत्वाद्यभावस्यद्रव्यादिवृत्तित्वात्सत्वादिसाध्यकद्रव्यत्वादावव्याप्तिश्च अ
थपृथिवीविशिष्टनयासत्वादेःसाध्यतायांव्यभिचारोगोजातिमत्वादावतिप्रसंगः व्युत्पादयिष्यतेहिविशिष्टाभावस्यविशेष्यवृत्ति
योगिताकत्वंहि तच्चवह्निनासाध्याभावस्यतत्रसत्वाच्च अथापृथिवीयोगित्वंप्रतियोगिताभावःसंबंधेनपृथ्वेणतद्व्यावच्छिन्नया
प्यत्वंहेतौ अस्तिचायंपृथ्वादौपृथ्वत्वादिनानापृथिव्यादिनिष्ठाभावप्रतियोगित्वमितिप्रत्ययादितिचेन्न तादृशप्रतीत्याहिपृथ्वत्व
द्वौप्रतियोगितायाअवच्छेदकत्वाभावोपृथ्वत्वेनतुतदभावावच्छेदकत्वंसर्वत्रैवपृथ्वेपृथिवीनिष्ठाभावप्रतियोगित्वं नचुकुत्रापिपृ
थ्वेतदभावदृत्तित्वअबाधितप्रत्ययात् अन्यथायोयोधर्मोयस्ययस्यनावच्छेदकःतत्तदवच्छेदेनतदभावोप्युक्तरीत्यासिध्येत्प्रमे
यधूमत्वेननवह्निमन्निष्ठाभावप्रतियोगित्वमितिप्रत्ययात्तदवच्छेदेनतादृशप्रतियोगित्वाभावस्यापिसुवचत्वाच्च अथप्रमेय
धूमत्वंगौरवेणनसाभानाधिकरण्यप्रतियोगितावच्छेदकंविवक्षितंचात्रतथेतिचेत् अस्तुभानाधिकरण्यंधूमकथ्यक्तिव

तित्तया वह्नित्सामानाधिकरण्यं तदवच्छेदकं कंबुग्रीवादिमत्त्वादिना च घटादेरसाध्यव्यापत्तिरिति वक्तुं व्याकोपः [illegible]
प्रतियोगितायाद्वयसकुक्षत्वतायामधिकरणावच्छेदकमित्युक्तावधिकनिस्तारः [illegible]
धर्मवत्वे सत्येव पूर्वस्मादभेदः तत्रसाध्यसजातीयसमानाधिकरणसाधनसजातीयत्वस्य अत्रत्वसाध्यसाधनसामानाधिकरण्यस्य व्याप्तेत्यर्थात् घटकपोतादृशप्रतियोगितावच्छेदकतत्तदन्योन्याभावात्यंताभावयोर्भेदाद्दत्यधिकन्नि
त अत्यंताभावगर्भतत्सामान्यविशेषभेदेनान्योन्याभावगर्भमधिव्याप्तिदूषणमाह [illegible] सामानाधिकरण्यात्तल्लक्षणा
दूषेन प्रपमेयकस्यसाध्याधिकरणांशस्याधि [illegible] कात्तृतीयं लक्षणं [illegible] वह्निसाध्यकस्यलेनतत्सा
ध्यवत्तत्तत्साध्यवत्त्वस्यसाधनसमानाधिकरणान्योन्याभावप्रतियोगित्वात्तदवच्छेदकत्वाच्चावाप्तिः [illegible]
वच्छिन्नवत्तादृशान्योन्याभावप्रतियोगितानवच्छेदकंतदूषावच्छिन्नसामानाधिकरण्यंनित्यत्वत्वात्वं [illegible]
गादौनदूषादौवासाध्येसर्वत्रसाक्षात्परंपरयावाऽनुगमकंवह्नित्वादिकमेवसाधनावच्छेदकंतदवच्छिन्नत्वस्यनता
दृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति यद्यदूषावच्छिन्नयादृशरूपावच्छिन्नमनवच्छेदकमित्यवाप्तिवारणायपर्याप्तं

संयोगिभिन्नभेदज्ञानेऽपिसंयोगभेदस्यतदुभेदस्यापिअवाप्यवृत्तित्वेनाविरोधात् नापिमूलावच्छेदेनतज्ज्ञानं असिद्धेः तदु
भावच्छिन्नभिन्नभेदस्यतदुभेदमात्रपर्यवसायितयाकपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्यमूलवृत्तित्वबाधाच्च नहि
घटभिन्नभेदोघटत्वादतिरिच्यतेऽवश्यकुम्भघटत्वेनैवोपपत्तावतिरिक्तकल्पनायांमानाभावात् अन्यथासर्वत्राभावस्या
भावोऽतिरिक्तएवकल्प्येत अतएवात्यन्ताभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोस्समानाधिकरणएवकुम्भो
विरोधःतत्रकपिसंयोगवत्त्वेपिवृक्षेमूलेनकपिसंयोगइतिप्रतीतेरन्यथानुपपत्त्यानावश्यसंबन्धोनत्वेषा प्रती
तिःकपिसंयोगिभेदविषयत्वेनोपपादयितुंशक्यानियमतःसंयोगवत्त्वेनप्रतियोगिनोऽनुपस्थितेःप्रतियोगिकोटौतदनुल्लेखा
च्चमूलेवृक्षेनकपिसंयोगीतिप्रतीतेस्तुशिरस्त्वविनष्टइतिवत्तभासमानविशेषणतास्याभावमात्रविषयत्वेनोपपत्तावतोभिन्न
योरयोगितिपर्यवसन्नं अन्योन्याभावोनतस्यप्रतियोगितावच्छेदकसमानाधिकरणतयास्वस्वप्रतियोगिता
वच्छेदकसामानाधिकरण्यपर्यवसायिनोविरोधस्यस्वघटितत्वेनविशेषणएवविश्रान्तात् अत्यन्ताभावप्रतियोगिनोरिव
अन्योन्याभावप्रतियोगितावच्छेदकयोर्बाधितसामानाधिकरण्यानुभवेनप्रतिरुद्धतयातत्पाविध्यविरोधकल्पनायाअ
नवकाशाच्चेति किंचशिरस्त्वविनष्टइतिप्रतीतेःविशिष्टध्वंसोल्लेखिन्याविशेष्यतादुर्वादास्तांविशेषणध्वंसविषयता

नसंयोगीतिप्रतीतेर्विशिष्टभेदमवगाहमानायाकर्थंविशेषणसंसर्गाभावविषयत्वेनोपपत्तिः नखलुसहस्रेणापिबा
धकैः इदंरजतमितिप्रतीतेरंगत्वावलंबनत्वेव्यवस्थापयितुंशक्यते नचविशेषणभेदएवतस्याविषयः अग्रेनक
थिसंसर्गीतिप्रतीत्यापत्तेः युज्यतेचाव्याप्यवृत्तिरन्योन्याभावः कथमन्यथापक्वतादशायांघटादावयंनश्यामः दंडादिवि
नाशासमयेचचैत्रादौनायंतद्दंडवानित्यादयोव्यवहाराः नचत्रविशेषणसंसर्गाभावएवप्रतीयतेअनुयोगिनिसप्रती
विनातदनुपपत्तेः नखलुभूतलंनघटइत्यादीनिकदाचिदपिघटसंसर्गाभावंबोधयंति तथात्वेवाघटोनघटइत्यादेरपि
प्रसंगात् अपिचविशिष्टवाचकदंडादिपदेभ्योधर्म्युपसर्जनतयोपस्थितस्यदंडादेःकथंप्रतियोगित्वेनाभावान्वयः इतर
विशेषणत्वेनोपस्थितस्यनिराकांक्षतयाअन्यत्रविशेषणत्वेनान्वयायोगात् नचविशिष्टोपस्थापकंपदंविशेषणमात्रप
रंतथापिचैत्रोनदंडोघटोनश्यामरूपमित्यादेरपिदंडादिसंसर्गाभावप्रतीत्यापत्तेर्दुर्वारत्वात् एतेननश्यःअभावोवा व
क्षणिकतयाविनैवसप्रतीमन्वयबोधसमर्थनंपास्तम् एवंचचैत्रोनपचतीत्यादौआख्यातादुत्पत्तिफलयोश्चोपस्थि
तस्यकर्तुरेव भेदोभासतइत्यस्तु वस्तुतस्तुन पचतिचैत्रः नेदंमैत्रस्येत्यादौविभक्त्यर्थस्यकृतेःसंबंधादेर्भावस्य

बोधनेनप्रमीनापेक्षतेऽपेक्षतेचप्रतिपत्तिकार्यस्येतिनियुक्तरनुपपादयिष्यामः नभःवैधर्म्यपरत्वयानश्याम
इत्यादेःश्यामादिविधर्मैक्यर्थः वैधर्म्यंचरक्तत्वादिकमेव भट्टकुमारिलाचार्यैःश्यामाद्रक्तोविधर्मानुपपत्तिरितीस्थविवदितीति
कृतंपल्लवितेन [illegible] ति निरूपितत्वमेतत् कार्येति इत्यंचाननुगताया अपिव्याप्तेर्नोक्तंयथानुमितिहेतुस्तथा
वक्ष्यते एतेऽन्योन्याभावगर्भे तादृशेति नानुद्दिश्यकिंप्रतियोगितावच्छेदकमेवनभवतीकिंवाभवत्येवपरंतुकुमारानामयस्य
समानाधिकरणतत्तद्धर्मावच्छिन्नप्रतियोगिताकानानाभावानांलाघवाद्दित्यभिप्रायः नाद्यःएकैकाभावप्रतीतिनोद्दोनस्तइ
तिप्रतीतेरस्तत्रविलक्षणत्वात् शबलादिनाद्दोनस्तइतिनिश्चयेपिएकैकाभावसंशयात् विषयाद्यनुगमेविनाऽनुगतप्रत्यया
योगात् नचाभावस्यद्दित्वाधिकरणप्रतियोगित्वमात्रेद्दित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगित्वमात्रंवाद्वयेनास्ती ताक
त्तिप्रतीतेर्विषयः तादृशद्दित्वाधिकरणव्यक्तिविशेषविरहिणितथाविधोभय — शालिनितादृशोद्दोनस्तइत्यप्रत्ययात्
द्दित्वसामानाधिकरण्येनाभानेपिप्रतीतेरनुगताकारत्वाच्च अनएवनतादृशप्रतीतेर्घटत्वपटत्वाद्यन्यतरत्वावच्छिन्नप्र
तियोगिताकाभावविषयत्वंअन्यतरानुल्लेखेपिघटपटीनस्तइत्यनुगतप्रत्ययात् नचपरंपरासंबंधेनतादृशद्दित्व २६

सामान्याभावएवहीनस्तइतिप्रतीतेर्विषयः तादृशहित्वाधिकरणयोरेवप्रतियोगित्वेनोल्लेखात् हित्वादेः घटादिवृ
त्तित्वानुपस्थितावपिअंतत:शब्देनापिघटपटौनस्तइत्यादिप्रत्ययाच्च अन्यथैकविशिष्टाभावेपिनतदाश्रयेव
र्तविरुद्धयोरपिजलत्वपृथिवीत्वयोर्हित्वेनाभावप्रत्ययादित्युक्तत्वाच्च नोक्तः तथात्वेपिसाध्यतदभावः तादृशाभाव प्र
तियोगित्वानधीनात् अंतरेणचाभावांतरमेकैकघटवृत्तिजायमानायायत्किंचिद्घटद्वयवृत्तिचानुत्पद्यमानायाघटौ
नस्तइतिप्रतीतेरुपपादयितुंशक्यत्वादित्यतआह अन्यथेति उभयत्रापिप्रतियोगितावच्छेदकंनतुसाध्यता
वच्छेदकंसाध्यत्वंवेत्यर्थः अन्यथाभावत्वावच्छेदकतोरपिलक्षणेतरेतरावच्छिन्नमिलितभावः तत्वेति स्वसाधन
त्वाभिमतं तथाचसाधनसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकायावन्नोधर्मः यद्धर्मावच्छिन्नसमानाधि
करणात्यंताभावप्रतियोगितावच्छेदिकास्तद्धर्मावत्वेठसामानाधिकरण्यमित्यर्थः एवंनसर्वत्रतादृशैर्यावच्छि
न्नयतादृशावच्छिन्नयावत्प्रतियोगिकस्यचानिषंजकत्वावश्याच्च यावच्छिन्नप्रतियोगिताकायत्तिरिक्तसंसर्गाभा
वस्याप्रसिद्धिः तादृशावच्छिन्नप्रतियोगिताकानायावदभावानामधिकरणस्यापिप्रायशस्तथा रूपादिसाध्यकपृथिवी

त्वादावव्याप्तिश्च क्वापि रूपादित्वकृतादृशयावद्भावसामानाधिकरण्यासंभवादिति प्रत्युक्तं सर्वत्रसोपाधावेकव्यक्तिकस्य
संभवतोऽनुपाधेर्धर्मांतरविशिष्टत्वादिनाऽभावैक्येवसाध्यसमानाधिकरणइत्यवच्छेदकानुसरणं साधनसमाना
धिकरणात्यंताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकायावंतोऽभावायद्भावावच्छिन्नसमानाधिकरणास्तद्भर्मा
वच्छीठसामानाधिकरण्यमित्यर्थः अभावश्चात्रभावभिन्नोत्यंताभावोग्राह्यः तेनेदंजलंस्नेहवत्वादित्यादौस्नेहवत्स
मानाधिकरणात्यंताभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानांसकलरूपाणांज
लत्वसामानाधिकरण्यविरहेणाव्याप्तिः घटध्वंसोध्वंसत्वादित्यादौचघटध्वंसत्वादेस्तत्यंतकारकप्रमाविषयत्वादेर्वा
भावाभाववृत्तिरतिरिक्तोऽभावः तादृशीनघटध्वंसत्वादिसमानाधिकरणइतिनातिव्याप्तिरित्यधिवदंति यावद्धिति
स्वसाधनंव्यभिचारियेषांतेषांयावत्तांव्यभिचारिणासाध्येनसमानाधिकरण्यमित्यर्थः यावद्धिति यावत्यदंसाध्य
त्वाभिप्रायं परे सोपाधिव्यभिचारणाथयावद्धिति लुप्तसप्तमीकस्यद्वितीयात्यंताभावस्यविशेषणं तथाचसाध्यव्यापकता
वच्छेदकावच्छिन्नप्रतियोगिताकात्यंताभावत्वव्यापकत्वसामानाधिकरण्यसामान्याभावकूटमर्थः केवलान्वयिन्य

लोकाकाशादिरेवंतथाविधाभावःप्रसिद्धइतिसंप्रदायविदः केचित्तुतादृशयावद्भावशून्यत्वंयदधिकरणतायाव्यापकंतत्त्व
मर्थः मचतादृशप्रतियोगितानवच्छेदकवंतभेदयावत्वेनविशिष्यतावत्तादृशाश्रयत्वंयदधिकरणतायाव्यापकंतत्त्वमित्य
र्थलाभादेवसाध्यसमभावद्वयोपपादनमनन्तरप्रयोजनकमितिवाच्यं यावत्तादृशाभिधानादीनामेकाधिकरणसाप्रसि
द्धेः मचानवच्छेदकांशमनुपादायाप्रतियोग्येवयावत्वेनविशेष्यतासाध्यव्यापकत्वाधिरुप्यांतरेणसाध्यसमानाधिकरणा
त्यंताभावप्रतियोगित्वस्योपदर्शितत्वादित्यादुः अवच्छिन्नसामानाधिकरण्येसामानाधिकरण्यावच्छेदकंयाव्याप्तिः इत्यंच
धूमत्वद्रव्यत्वादेःव्यापकत्वावच्छेदकत्वंदंडत्वादेर्नियतपूर्ववर्तितावच्छेदकधर्मात्मकैकारणतावच्छेदकत्ववदभेदेवि
वक्षितानुपस्थितभेदाद्वासमर्थनीयंतत्रायमभिप्रेत्याहयत्संबंधितेति सासंबंधितासामानाधिकरण्यरूपाजनकत्वादि
त्यादुक्तं अत्रचविशिष्टसत्तात्वावच्छिन्नगुणादिसामानाधिकरण्याधिकरणसत्तादेःकर्मादौपरामर्शाद्गुणाद्यनुपस्थितिः
साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शस्तुपक्षेसाध्यनिर्णयात्त्यागसंभवीत्याशयेनद्वितीयं अथमालोकोधू
मोवेत्यादौविशिष्यसंदेहेपिसामान्यतोऽवच्छेदकरूपवत्त्वनिर्णयःसंभवत्येवेतिहृदयं अत्रावच्छेदकत्वंनात्यूनत्वनिरू

अन्यूनानतिरिक्तवृत्तित्वं वा वक्तव्यं दोषाधेयेत्यत्राव्याप्तिप्रसंगात् धूमत्वावच्छेदकावच्छिन्नाभावप्रसंगाच्च किंचनतिरिक्तवृत्तित्वं तच्चयच्चि
त्किंचनैतदभाववद्वृत्तित्वंगुणवान्सत्वादित्यादौसत्तायामतिप्रसंगात् अन्यकर्मादिवृत्तिजातावच्छेदेनगुणसामानाधिकरण्याभा
वस्यासत्तायांवर्तमानत्वात्तथा तथासत्तिविशिष्टसत्तायाःप्रागुपदर्शितदिशाचधूमत्वावच्छिन्नाव्याप्तिप्रसंगात् तथाप्यतिरि
क्तेयद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वंनवर्त्ततेतत्वं साध्यासमानाधिकरणवृत्तित्वविशिष्टाधिकरणवृत्तित्वसामान्यक
ल्वे स्वविशिष्टाधिकरणवृत्तियावत्साध्यासमानाधिकरणकत्वंवेतिफलितार्थः सत्तात्वविशिष्टसत्ताधिकरणकर्मादिवृ
त्तित्वस्यसाध्यासमानाधिकरणेकर्मत्वादौसत्वान्नातिप्रसंगः कर्मोद्यन्यत्वन्यविशिष्टसत्ताश्रयश्चनकर्मादिरितिनाप्रसंगः
एवंचमेयत्वादेरपिकेवलान्वयिसामानाधिकरण्यावच्छेदकलोपपत्तिः धातुवृत्तिमत्वादिकमेवतत्रव्याप्तिः तद्धेस्तुमे
यत्वादिनेति तत्र व्याप्तिविरहेवृत्तितयाग्रहत्वमात्रेणरूपेणव्याप्तिग्रहासंभवात् अन्यथातिप्रसंगात् साध्यतावच्छेदक
संबंधेनसाध्याधिकरणेयेनयेनसंबंधेनार्थतामानत्वंहेतुतावच्छेदकसंबंधेनहेत्वधिकरणेपितेनतेनसंबंधेनतत्वंवोध्यं
नीलधूमत्वादेर्वारणीयत्वेतुस्वसमानाधिकरणतादृशधर्मांतरघटितत्वेनविशेषणीयं सामानाधिकरण्येपादानात्
धूमप्रागभावत्वादिसंग्रहः तद्घटितत्वंचतद्विषयकप्रतीतित्वं स्वरूपसंबंधविशेषएवावच्छेदकत्वे ज्ञानत्वे २८

नत्वप्रसङ्गमवच्छेदकमित्यपि संगच्छते अव्याप्त्यप्रसङ्गे अनतिरिक्तत्वस्याप्रसङ्गेनतत्तिरस्करणायोगात् विरु
द्धयोश्चाभावाभावयोरधिकरणैक्यस्यैकेनसंबंधेनवृत्तिर्विरुध्यतेऽतस्तत्रावच्छेदकभेदापेक्षा अतएवव्यभिचारि
णिसाध्यतद्भावसामानाधिकरण्ययोर्विरुद्धयोरुपाधावनयोपाधितद्भावावच्छेदकावनुगन्येनेत्याचार्याः समा
त्वेतुगुणाभावस्येवमुणस्यापिसामानाधिकरण्यावच्छेदकंविरोधात् अव्याप्यवृत्तेश्चकपिसंयोगादेरधिकरणेवृक्षादौ
तद्भावस्यसंयोगेनचवह्नेरधिकरणेमहानसादौसमवायावच्छिन्नप्रतियोगिताकतद्भावस्यसंयोगेनाविरुद्धत्वात् वह्नि
मत्संयोगेनवर्तमानस्यधूमादेर्वह्न्यभाववत्तासंबंधेनावर्तमानत्वाच्चएतद्धूमत्वादेर्नसाध्यसामा
नाधिकरण्यावच्छेदकत्वविरोधः व्यभिचारधीरप्येतद्व्याप्तिबुद्धौविरोधिन्येवतद्भेदविशिष्टस्यसाध्यानधिकरणवृत्ति
त्वग्रहेतद्भेदेनसाध्याधिकरणवृत्तित्वग्रहायोगात् अन्यथाहेतुवृत्तिधर्मस्यसामानाधिकरण्यानवच्छेद
कत्वमेवव्यभिचारः तद्धीरेवसाक्षाद्विरोधिनी व्यभिचारतारधीस्तुपरंपरयेति नीलधूमत्वादिकंतुगौरवान्नावच्छेदकं
एवंचलघुघटत्वादिकमेवसामानाधिकरण्यावच्छेदकंव्याप्तिः नतुतत्सहचरितंबुद्धीवादिमत्त्वादिकं तेनचगुरुणा

पिरूप्येण व्याप्तिग्रहे कषायांहेतोरुपन्यासे चानुयोगः प्रकारांतरव्याप्तिवादिनामयिसमाधानः [illegible]
गुणसाधारणस्यगुणत्वस्यद्रव्यवृत्तिसाधारणस्यगुणासंभवेनतत्वेसतिद्रव्यसमवेनत्वस्यवाएकस्यावच्छेदकत्वसंभवेन
बहूनांरूपत्वादीनामपिननत्वं विरुद्धधर्मद्वयाधिकरणयोश्चएकस्मिंकेनसंबंधेनवृत्तौकर्पविरोधः कर्पवाद्रव्यत्वादौ
साध्येहेतुत्वेनविशिष्यरूपादेःप्रयोगःतथापरामर्शाद्धूमानुमितिनिर्वाहायविभावनीयं [illegible]
णत्वंसाध्याधिकरणतायाअवच्छेदकंसंबंधोव्याप्तिः [illegible] धूमस्य धूमवतः धूमत्वं वह्नेस्तु वह्निमत्तास्विरा
दिप्रकारेणवाच्येयः अत्रचावच्छेदकत्वंस्वरूपसंबंधविशेषः विरुद्धदिक्कालावच्छिन्नवृत्तिकस्यन्यूनदेशकालवृ
त्तिकादेश्चाधिकरणतायानदसंभवात्तुल्यवृत्तिकधर्मद्वयाधिकरणतयोर्निरवच्छेद्यावच्छेदकभावस्यनिर्णीतुमश
क्यत्वान्न साध्यन्यूनवृत्तित्वं न्यूनवृत्तिकधूमादेर्व्याप्यतापत्तेः किंत्वनतिरिक्तवृत्तित्वं स्वान्यूनवृत्तित्वतत्समवृत्तित्वयोर्मध्ये
अनतिरिक्तवृत्तित्वमित्यर्थः अतोनकेवलान्वयिन्यव्याप्तिः अत्रेदंबोध्यं यदन्यूनवृत्तिसाध्यंतत्तेस्वव्यापकसाध्यसंबंधितत्पर्यवसन्नमपेक्ष्यगौरवं
परमवशिष्यतेतच्चग्रंथकारेणवाग्वैविवेचयिष्यतीत्याहुः [illegible] उपाधिनेति विशेषणतापन्नेनउपाध्युपवेशेने

नियावत् वन्हावार्द्रेधनप्रभववन्हित्वेनरासभार्द्रेधनाद्दीतथाविधवन्हिविशिष्टत्वेनधूमसंबंधेऽप्रवन्हिव्यभिचारेतथा
विधवन्हेरप्यनुपवेशात्तरासभत्वादिकंतु निवेशनेनवेत्यन्यदेतत् अत्रत्वदुदंस्नेहवत्तनिस्नेहंवास्यशीतद्रव्यत्वंविनापृ
थिव्यप्रवेशंशीतत्वेनशीतान्यत्वेनवासाध्यासमानाधिकरणतयासाधनव्यापकतयावास्वयमनुपाधिनाकेवलेनविशे
षणीभूयवाशीतान्यस्यर्शत्वेनचोपाधिनास्वतएवस्पर्शीसाध्यसंबंधोऽप्रवन्हित्वस्युपाधिर्नेवेतिनियमेनतात्पर्य
परंनुप्रदूषणसाधनतावच्छेदकस्यानवच्छेदकत्वभंगे यतएवसोपाधौसाधनतावच्छेदकांतरिक्तेनियतमवच्छेदकमत
एवनदृष्टोपसंहारोपाधिरितिवदंतीत्याहअतएवेत्यादि अत्रावच्छेदकत्वंसामानाधिकरण्येन तत्त्वंचान्यूनवृत्तिस्वं
व्यापकत्वमितियावत् तत्साधिकरणंतभावेनतेनसाध्यविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनसमव्यापकाधिकरणतांक
त्वंपर्यवसितार्थः निरुक्तविशिष्टसाधनव्यापकत्वमितितुनिष्कर्षः इत्थंचसतांघटकव्यक्तिकेनुनिष्टद्रव्यत्वादिसामा
नाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगिनिघटत्वादौनातिप्रसंगः मधाद्रव्यजन्यत्वेसतिसत्वादित्यादौद्रव्यत्वा
दिविशिष्टसत्ताद्यव्यापकैस्पर्शाद्यत्वावप्रसंगः स्नेहस्यशीतद्रव्यं[illegible]दित्यादौशीतस्पर्शान्यत्वस्यान्यत्वादेर्वा र

सत्ता

णयत्नेत्यादि तच्च साध्यविशिष्टसाधने विशेषणं साध्याभावविशिष्टात्साध्यसामानाधिकरण्येन व्यावर्तकं साध्याभावविशिष्टनिरूपकसाधनवदवृत्तीति यावत् तच्च द्रव्यमसत्त्वादित्यत्रसत्तायाअभेदेधिगुणकर्मान्यत्वेनाव्याप्तिः तत्तद्द्रव्यकर्मान्यत्वेसतिसत्त्वादित्यत्रगुणान्यत्वादौ तत्तद्द्रव्यसाधनतावच्छेदकस्यअनवच्छेदकत्वयोगनाथपरंतन्निरुक्तमुक्तं ननुविवक्षितमेवतत् वैयर्थ्यात् इदंदधिजन्यंवादध्नइत्यादौदधित्वाद्यव्याप्तेश्च गन्धप्रागभावसाधनतावच्छेदकावच्छेद्यपृथ्वत्वसाधननिष्ठसाध्यसंबंधितावच्छेदकत्वपूर्वदलार्थः अनवच्छेदकत्वंचतस्यसाध्याभावविशिष्टसाधनवृत्तितया तद्विशिष्ट
साधनस्यसाध्याभाववद्वृत्तित्वेन साध्याभाववत्तत्तद्विशिष्टसाधन वत्वेनेतियावत् ग
नेनधूमवान्मेयवत इत्यादौमेयानवच्छेद्यसाध्यसंबंधाप्रसिद्धिः गुणवद्गुणकर्मान्यत्वेसतिजातिमत्त्वादित्यादौजातित्वा
दिघटकनित्यत्वादेर्वैयर्थ्येनविशिष्टस्यानवच्छेदकतयागुणकर्मान्यत्वादेरुपाधितापत्तेश्चेतिनिरस्तं अनवच्छेदकत्वं
चसामानाधिकरण्येन तथाचसाध्यविशिष्टस्यसाध्यसंबंधितानवच्छेदकसाधनतावच्छेदकावच्छिन्नसाधनस्य व्यापक
त्वमर्थः पर्यवस्यति उपदर्शितशीतस्पर्शान्यत्वादिवारणायतत्रेत्यादि तच्च साधनतावच्छेदकविशिष्टेसाधने विशेष ३९

ण साध्यशून्यत्वापत्तौ यैकं यत्सामानाधिकरण्यविशिष्टप्रकृतसाधनवत्त्वंसाध्याभाववत्तिनिवर्तनत्वृत्तियावत्
साध्याभावविशिष्टप्रकृतसाधनाधिकरणसामान्यात्साध्यविशिष्टप्रकृतसाधनाधिकरणसामान्यस्यव्यावर्तकमित्यसे
मुदायार्थनिष्कर्षः केचित्तु विशेषण समानाधिकरणं तथाचसामानाधिकरण्यप्रत्यासत्त्यायेनावच्छिद्यतेऽवच्छेद
कीभूतसामानाधिकरण्यप्रतियोगीत्यावत् अवच्छेदकत्वंचेहान्यूनानतिरिक्तवृत्तित्वं गुरोरप्युपाधिसामानाधिक
रण्यस्याक्षतत्वेव व्यक्तिपक्षेपत्यक्षमुद्भूतरूपान्महानित्यद्रव्यत्वादित्यत्रमहत्त्वस्यानित्यसमवेतत्वस्यचवक्ष्यमाण
लक्षणाक्रांतस्योपाधेःसामानाधिकरण्यंसाध्यसामानाधिकरण्यन्यूनानतिरिक्तवृत्ति नथापिहेतुनिष्ठसाध्यसामाना
धिकरण्यस्य हेतुनिष्ठयत्सामानाधिकरण्यंअन्यूनानतिरिक्तवृत्तित्वंविवक्षितं सत्वनिष्ठद्रव्यत्वसामानाधिकरण्य
स्यतन्निष्ठकर्मान्यत्व-सामानाधिकरण्यमनतिरिक्तवृत्तिगुणेनदभावावच्छेदकावच्छिन्नवृत्तिकत्वात् पृथिवीत्वादिसा
मानाधिकरण्यंन्यूनवृत्तिजलादौतदवच्छेदकावच्छिन्नवृत्त्यत्यन्ताभावप्रतियोगित्वात् साध्यव्यापकानांसङ्कीर्णोपाधि
त्वमेवसाधनतावच्छेदकभिन्नेनेति तदनवच्छेदार्थमेकमित्युक्तं ननुसर्वत्रसोपाधौसर्वेणोपाधिनासाध्यसं

बंधोऽवच्छिद्यतइतिनियमः अयंपक्षोभूतत्वादित्यादौउभूतरूपवत्तादेः तदसंभवादित्यतआह अतएवेति यत
एवोभूतरूपवत्तादेर्नतथात्वसंभवः अतएव तत्र तादृशनियमवाहिमते इंद्रलक्षणमिति साधनाव्यापकत्वमिह
मा साध्याविशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वंतादृशसाधनासामानाधिकरण्यंपर्यवसितं तेनोपदर्शितोभू
तरूपवत्तादौनातिप्रसंगः अपक्षोद्रव्यत्वादित्यादौपटत्वादावतिव्याप्तिः साध्यव्यापकत्वेनविशेषणेचसएषोभि
दा नातनयत्वादित्यादौशाकपाकजन्यत्वेव्याप्तिरतउक्तंसाधनावच्छिन्नेति तेहि साध्याभावसंबंधिनिविरुद्धस्यसंबंधस्या
वच्छेदकभेदंविनाअनुपपद्यमानस्यावच्छेदकीभूतोपपादनमुपाधिफलेनदसमर्थानांचोपदर्शितोभूतरूपव
त्वादीनांनोपाधिभावःसंभवतीत्याह अभिचारीतीति अभिचारःसपक्षविपक्षवृत्तित्वं अपविपक्षगामिरूपव्य
भिचारोनयनेनेवोपाधिफलेनचोभूतरूपवत्वादीनामप्यस्तीत्यतआह अतएवेति यतएवसाध्यसंबंधिनावच्छेदकरू
पंव्याप्तिःसोपाधौतुसाभाविकंहेतुनावच्छेदकंनतत्साध्यसंबंधिनावच्छेदकंअतएव सएवसमीपवृत्तिनिःसमानाधिकरणो
व्यभिचारीतिहेतौचनिषेधसाध्यसंबंधिनावच्छेदकरूपलक्षणं व्याप्तिसंक्रामकतयासाधकव्याप्यस्यैवोपाधित्वमाचार्यै
रनुमन्यतइत्याहअतएवेति साध्यसमानवृत्तावुपाधिव्यवहारंदूषयतीपैकरूप्यस्यवाच्यतयाऽपाधिपदस्ययोगरू

३१

दित्यव्याप्तेननिराकुरुतेलक्ष्यंतिति लक्षणं दूषणोपैकरूपं साध्येति अत्रसाध्यव्यापकत्वमात्रंविवक्षि
तंतावतैवसाधनवत्तिव्यावृत्तिरेकेणसाध्यव्यतिरेकेणत्रयसंभवात्साधनवत्तिव्यापकनिवृत्यासाध्यसाधनसंबंध
निवृत्तिसिद्धावर्थात्साध्यनिवृत्तिःसिध्यतीतिप्रकारांतरप्रदर्शनायपरंतथाविधोक्तिः रूक्षान्यूनवृत्तावुपाधिव्य व
हारंनिरस्ययोगेनाधिकवृत्तौतंनिरस्यतिविषमेति प्रवृत्तिनिमित्तं यौगिकं व्यभिचारोद्भावकत्वमेवेत्येवकारेण
योगानादरंसूचयति उपाधित्वं उपाधिपदप्रवृत्तिनिमित्तं उपाधिना उपाधिपदवाच्यता योगादरेतुलाघवात्
साध्यव्यापकतामात्रेरूढिरितिभावः॥ ॥ ॥अस्मिन्रूपंनिरूप्यपरमतनिराकरणपूर्वकंस्वमतेनेतद्रूपो
यमभिधातुंप्रथमंप्राभाकरमतमुपदर्शयतिसंयोगित्वादिना दर्शनानांप्रत्येकंहेतुत्वेमिलितानांवा मेलनमयिस्वरूपनो
व्यापारोवा आद्येदर्शनानामिति द्वितीयेऽप्युत्तरेति क्रमिकाणामयिस्मिरणानस्मिरणानामयिसहोत्पन्नानांमेल
नमस्तीतिउभयमुपात्तं तृतीयमाशंक्यनिराकुरुतेनचेति व्यापकसामानाधिकरण्यास्मिकायांव्याप्तौसाध्यसामाना
धिकरण्यांशस्यप्रथमभेवगृहीतत्वानुवगृहीतव्यापकत्वांशग्रहेसतिचारदर्शनजन्यसंस्काराणांहेतुत्वेवाच्यं
तच्चनसंभवतिभिन्नविषयकत्वादित्याहसमानेति भ्रमस्त्वगृहीतभेदज्ञानद्वयेनतुवैशिष्ट्यावगाहीतिभावः तत्त

नव्याप्तिग्राहकं व्याप्तिचारादर्शनं व्यापारतयासहकारी व्याप्तिचारादर्शनसहचारदर्शनसहकृतस्तर्क एव व्याप्तिग्रा
हकः भूयोदर्शनंतु कवितर्कप्रवणौऽपयुज्यतइतिनिर्गलितंनैयायिकम[illegible]तमाशंकानिराचष्टे नन्वेवमिति [illegible]
[illegible]तन्मूलकोयासंतर्कोव्याप्तिग्राहकतर्कोवतारइतिभावः तर्हीति नव्याप्तिप्रत्यक्षंप्रतितर्कोहेतुः ननुस्मरणमितिनव्य
भिचारावकाशः विनानुभवंस्मरणायोगात् नजन्मांतरीयगः सः जन्मांतरेपिपर्यनुयोगतावस्थ्यात् उन्मादिस्थेनचपरि
हारः परंतोपिविचारयिष्यतेनेति मानाभावात्तर्कस्यचहेतुतासिद्धेः यद्विचारहीनस्यचारहीनपुरोवर्तिसंसर्गक
स्यवाऽत्यासत्तिलेऽतिप्रसंगः तदपुरोवर्तिनिनद्रुहोभ्यनोननुसामान्यलेनेत्याहनसतीति सार्ध्यव्यापकत्वं साध्यसमा
नाधिकरणाभावप्रतियोगित्वंतद्द्रुहः साध्याधिकरणैकव्यक्तिवृत्तितयागृह्यमाणस्यतादृशव्यक्त्यंतरग्रहंविनानसंभ
वनीतिभूयोदर्शनापेक्षातदाहितसंस्कारो[illegible]बहिरिंद्रियमात्रस्यसहकारिमनसोपिवाऽऽद्येतद्व्यापारंविनेति द्वितीयेना
पीति यद्येवात् साध्यसाधनसंबंधग्रहकानिरिक्तानपेक्षग्राहकत्वात् उपाध्यभावग्राहकस्यापेक्षणीयत्वादसिद्धिनि
रस्यतितथाहीति उपाधिस्मरणादित्यादि नन्वेवमसन्निकृष्टहेतुकानुमितिर्नस्यात् उपाधियोग्यानुपलंभविरहाद

तयाविशिष्येव कार्यकारणभावः तथा च साधनं यत्र साध्याभाववद्वृत्तिसाध्यतावच्छेदकं साधनवन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदक
कभिन्नादिकमनेकविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धं तत्र यथायोगं तदभावः पुरुषनिष्ठो व्याप्तिग्रहे हेतुः अतएवैकविधेऽपि व्य
भिचारज्ञानविरहेऽन्यविधव्यभिचारज्ञानात् व्याप्तिधीप्रतिरोधः एवं च क्वचिद्व्यभिचारज्ञानस्याप्रसिद्धात्तदभावस्याहेतुत्वेऽपि
नक्षतिः प्रसिद्धयोः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकतादिवृद्धेः समानविषयतयातदभावबोधविरोधि नत्वत्त स्वानुरोधे
तिदि थाकल्पनेनवयंवारयामः यद्वित्तत्तत्कारणत्वनिवेशेनविशेषेनपर्यवस्येदिकं व्याप्तिग्रहे व्यापकवह्निसमानाधिकरणवृ
त्तिधूमत्वादिकंतादृशसामानाधिकरण्यमात्रस्यरासभादिसाधारण्यात् अतव्यापकत्वंग्रहेव्यभिचारग्रहःसमानाधिकरण
वृत्तित्वंग्रहेविशेषणतयासामानाधिकरण्यस्यग्रहोहेतुरितिनवत्तव्यं साध्यसंबंधितावच्छेदकरूपवत्त्वलक्षणव्याप्तिग्रहे
स्य विशेषणतयासंबंधग्रहोहेतुरित्यपिकेचित् यत्तुविरुद्धेसहचारभ्रमेणाव्यापकत्वभ्रमदर्शनात्सामान्यतएवसहचार
ज्ञानंहेतुरिति तन्न असिद्धत्वात् विरुद्धेपिव्यापकत्वसामानाधिकरण्ययोःग्राहकसामग्रीक्रमयोगपद्याधीनग्रहक्रमयोग
पद्यंनतुनियतःकार्यकारणभावः इदंपुनस्त्रावधेयं यथाविद्यमानमपिवह्नित्वेव्यवहितविप्रकृष्टरासभादिदेशनिष्ठाभा

वप्रतियोगिज्ञानवच्छेदकलक्षणग्रहस्यतेऽभावदेशविप्रकर्षादिनाग्राहकाभावात् तथाधूमवन्निष्ठाभावप्रतियोगिज्ञानवच्छेदक
त्वसहेप्यग्रहसंभवात् नानुपलब्धेःप्रतियोगिसत्त्वविरोधित्वादिलक्षणायोग्यतेतिनतत्सामान्याभावोलौकिकप्रत्यक्ष
गम्यः परंतुकर्षविनाविरोधस्फुरणादिवशात्तधूमत्वादेर्ग्रहीतोधूमनिष्ठाभावप्रतियोगिज्ञानवच्छेदकत्वाभावो वन्निष्ठा
भावप्रतियोगिज्ञानवच्छेदकत्वेनगृह्यते अतस्तद्वानुमानादिनाव्यभिचारग्रहेणिनव्याप्तिधीर्निर्णयात्मनिसाधारणोवादोषविशेषाजन्य
ज्ञानीत्यनेनसंशयादिसाधारणस्यनिश्चयात्मनोवाविपरीतज्ञानमात्रस्यैवप्रतिबंधकत्वात् तत्तद्भावादेदेशांतरवृत्तित्वसंभाव
नाविरहादिवशादसाधारण्यभावबहुत्वाभावोधूमत्वाद्यवच्छेदेन ग्रहणेलाघवादितिवक्ष्यति॥ ॥कुलालनरसभादिप
दार्थसाधर्म्यान्वयव्यतिरेकयोरन्वयव्यतिरेकोधूमस्योपलभमानोऽवश्यमेनेवान्यत्रतमकारणंधूमस्यनिश्चिनुयादिति
ध्ये किमेतानिसर्वाण्येवकारणानिकिंवाकानिचित्तथाकानिचिदेवेति तत्रचयावद्व्यतिरेकेपिदूरतरेभ्यस्तथाविधेभ्योधूमोत्पत्ति
मुपलभमेतस्याहेतुत्वमवधारयति यथाचसभादेःयस्यचव्यतिरेकेतादृशाग्रसकलान्वयेधिधूमानुत्पत्तिंपश्यतितस्य कार
णत्वमेवनिश्चीयते यथावह्नेः तत्रचाकारणकत्वसंदेहोविरोधितामात्रादृश्यन्येनतर्केणनिवर्त्यतेतादृशतर्कमाहधूमइ ३४
त्यादिना अनुसंधेयश्चअवश्यंकार्यकारणभावग्रहःतदधीनत्वाच्चाग्निबुद्धेःसामानाधिकरण्येनान्वयव्यतिरेकग्रहान्नाय

वह्निशून्यात् तदुपादानमिति करणव्युत्पत्त्यानदीयकार्यप्रयोजकतज्ज्ञानपरं तादृशान्वयव्यतिरेकानुविधानज्ञानपरं वा अग्रे
तनमपि स्वक्रियापदं तत्सरमेव रुत्यादेः शंकाप्रतिबंधकलेशनाभावात् कारणताग्रहोत्तरकालीनत्वाच्च यद्यपि च एतावताधू
मवह्नित्वेनैव कल्पनायां तृणारणिमणिन्यायेन वैकल्पिककारणतायामपि तथा लेसंभवति तथापि विशेषयोः को
र्यकारणभावग्रहः तर्केणतद्विरोधिशंकायामपनीतायां जायमानः सामान्यव्याप्तिविचारनिर्णयादनुगतागुरुविशेषरूपानुप
स्थितिलाघवप्रतिसंधानाद्विशेषसामान्यतएव तत्परिच्छित्तिः प्रामाणिकोचितैवान्वयव्यतिरेकौ फलबलेनबलाधवज्ञानाद्विशून्या
यादेवसामान्यव्याप्तिविचारशंकायाः प्रतिबंधकत्वंकल्प्यते परेधूमत्वावच्छिन्नस्यवन्यजन्यत्वेनजन्यत्वविशिष्टस्ययथाश्रुतवन्ह्य
सभवहितजन्यत्वस्यव्यतिरेकएवापादनीयः तथोक्तन्यायेनतादृशवह्नियुक्तकारणकलापजन्यत्वग्रहेणतद्व्यतिरेकजन्यत्वशंका
निरासात् वह्निविरहेपिनिरतिशयस्यैवतादृशसमूहस्यधूमजनकत्वसंदेहस्यैवंविधधूमानुत्पाददर्शनेनैकयोगात् तादृशस्यैव च
क्वचिद्दहिंक्वचिच्चेतरदासाद्यजनकत्वसंभावनायाश्चक्वचित्धूमानुत्पादप्रयोजकत्वेनावधृतस्य वह्निविरहस्यैवतथाविधसमू
हसत्वेधूमानुत्पत्तिसामान्यंप्रतिलाघवात्प्रयोजकत्वनिर्णयेनायमनुमानप्रयोगः अत्रेदं वह्निः वह्निसमवहितस्य उपादानं अत्रैव
नियमश्चवह्नेरस्यवन्ह्यसमवहितानुपादानस्यप्रयोजकेतदजन्यत्वज्ञाने परंपरयावह्निसमवहितोपादानस्यकाप्रयोजकेनतत्ता

प्रिचार इत्यतआह विशेषदर्शनेति तथाचयथानस्यबोध्यत्वादभाववद्विशेष्यकत्वेसत्यसत्यत्वेतथानर्कस्यापीति अत्रचसत्यत्वादि
संपादकैधर्म्मिलोबोध्यादिमत्वेबोध्यादिमद्धर्म्मिसंनिकर्षेवातात्पर्यग्राह्यवात्तर्कस्यव्यभिचारेणाहेतुतायास्वयमेवदर्शितत्वात्च अप
विपरीतज्ञानानंतरप्रत्यक्षेनतन्निवर्त्तकत्वेनविशेषदर्शनस्यहेतुत्वंतत्रतर्कस्यापीतिचेत् अस्तुतावदायातंतत्तथा तथाप्यन्यत्रकु
प्रमाणादिप्रयोजकादेवतत्रप्रामाण्यंयुपपद्यतेनतस्यापिविशेषतः कारणत्वंगौरवात् उक्तंचविशेषणज्ञानस्यविशिष्ट
ज्ञानकारणत्वमतेसर्वत्रविशेष्यसंदेहसंबद्धविशेषणज्ञानमेवप्रमाभ्रमयोर्जनकत्वमितिवदंति तत्रप्रमाणमिति इदमनादि
सिद्धत्वज्ञानस्यप्रयोजकत्वमभिप्रेत्यपरार्थानुमानाभिप्रायेणवा अनुमानत्वात् व्याप्तिग्रहाधीनप्रवृत्तिकत्वात् व्यभिचारादि
शंकेति दूरेणचहरिणोनान्यथासिद्धिरितिभावः अनुमानमात्रमिति अनिश्चितसाध्यपक्षकंसर्वत्रसंभवित्वात् पक्षेसा
ध्यनिर्णयेअनुमानवैफल्यात् व्याधित्वेन स्वव्यभिचारेणसाध्यव्यभिचारोत्थापकत्वेन अनुमात्रोच्छेदकता[illegible]ज्ञानमेव मान
साध्यव्यापकताबुद्धिविरुद्धयादित्याशंक्याहअपिचेति कारवन्हीति परमतेनेदं स्वमतेनतुवायुवादौव्यर्थादिनाहव्यादिसाध
ने शक्तिरिक्तविशेषणप्रक्षेपेणवानद्वोध्यं॥ ॥ ॥उक्तव्याप्तीति प्रतियोग्यसमानाधिकरणत्वविशेषणविरहेण ३६

लाघवात् [illegible]संयोगत्वभेदस्यापिसंयोगाभावस्येवहेतुसमानाधिकरणग्रहेपिअनुमितिदर्शनात्तत्रापितद्धटत्वं
निवेशनीयमितिचेत्तुल्यलाघवं [illegible]त्वंप्रतियोगिसमानाधिकरणाद्यवृत्तिर्हेतुसमानाधिकरणाभावप्रतियोगित्वानव
च्छेदकत्वग्रहेपिअनुमितिर्नस्यात् [illegible]त्वप्रतियोगिसमानाधिकरणत्वेनासाधारणानाधर्मवत्तौहेतुसमानाधिकरणाभावात्त
त्प्रतियोगित्वावच्छेदकत्वाभावग्रहोहेतुरितिचेन्न तादृशाभावग्रहोहिनहेतुसमानाधिकरणाभावप्रतियोगित्वावच्छेदक
त्वेनरूपेणप्रतियोगिसमानाधिकरणतादृशाभावप्रतियोगित्वावच्छेदकत्वग्रहेतदसंभवात् नापिप्रतिबन्धिकरूपेण
जन्यसहस्रेणाप्यसंभवात् नापिरूपांतरेण वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्यधूमसमानाधिकरणभ्रमेपिवह्नि
त्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणाभावप्रतियोगित्वानवच्छेदकंवह्नित्वमितिज्ञानेप्यनुमितिप्रसंगात् [illegible]च
हेतुसमानाधिकरणत्वेनज्ञायमानइतिचेन्न वह्नित्वेधूमसमानाधिकरणाभावाभावप्रतियोगित्वावच्छेदकत्वभ्र
मेप्युक्तरूपेणतथाग्रहसंभवात् धूमाधिकरणानुपस्थितौवह्नित्वेरासभत्वाद्यौचतादृशभ्रमोत्तादेरिरासभादेरिवच
क्षेरप्यनुमानात्च एवंवह्नित्वावच्छेदेनभूकुलाभावभ्रमदशायांभूकुप्रतियोगिकावह्नीतरप्रतियोगिकाश्चयेधूमस

मानाधिकरणाभावात्तत्प्रतियोगितानवच्छेदकं वह्नित्वमिति ग्रहेपि [illegible] एवं प्रतियोग्यसमानाधिकरण हेतुसमानाधिकरणाभा
व प्रतियोगितावच्छेदकत्वग्रहविरोधिग्रहविषयत्वेनतेषां तादृशावच्छेदकत्वग्रहविरोधित्वेनतद्बुद्धीनांवाऽनुगमात् विरु
द्धाद्धिहिंसाभान्याभाववबोधोपिसामान्यघटितविशेषत्वबुद्धिं सत्यांहिघटोनास्तीतिबुद्धेर्जात्यविनीलोघटोनीलोतिबोधानुदया
त्तत्तत्कृत्यहेतोः तद्विशिष्टप्रतियोगितावुद्धिप्रतिबद्धवह्निताभावबुद्धेःविरोधित्वात् अवगाहनेचनीलघटवत्तावुद्धिरपिघ
टत्वेविशिष्टबुद्धा [illegible] वावच्छेदकतत्वयोरन्योन्यात्यन्ताभावबोधयोरुपसंग्रहः हेत्वाभासेचवक्ष्यमाणशैलादिहाप्यनुसं
धेया यद्धि यत्साध्यतावच्छेदकस्याभावप्रतियोगितानवच्छेदकत्वग्रहानानुमितिः तत्तादृशावच्छेदकत्वग्रहविरोधित्वमपि
निवेशनीयं अन्योन्याभावस्याव्याप्यवृत्तित्वग्रहेतुसूत्तरंविशेषणादानमिति सत्यं तथाप्यन्योन्याभावेप्रतियोग्यवृत्तित्वस्ये
वविशेषणत्वेनप्रतियोगितावच्छेदकसंबंधभेदानुधावनप्रतीलाघवमिति यथाश्रुतग्रंथानुरोधिनः अत्रेदमुच्यतेअन्योन्याभावो
भावगर्भव्याप्योरेकतराग्रहेप्यन्यतराग्रहादनुमितेरनुभविकत्वात्तदुभयज्ञानमेवहेतुः दृष्टियसंयोगाद्धि वह्नेविशिष्यैवकार्य
कारणभावान्नव्यभिचारः [illegible] यद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थितोभावबोधनिरूपितत्वसामानाधिकरण्यसाध्यवत्तावुद्धिविरु
द्धाद्धितद्रूपावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यावगाहिनोग्रहस्यविरोधित्वेनव्याप्तिबुद्धावनुगम नीयाःप्र

कागतिः [illegible]स्याधिकरणावच्छिन्नवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकसंबंधेन हेत्वधिकरणे
यद्धर्मविशिष्टाधिकरणावच्छिन्नवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकसंबंधेन हेत्वधिकरणे
र्मविशिष्टवत्वेवानुमितिर्न [illegible] अत्रक्रियाकर्मत्वविशिष्टसंबंधेन हेत्वधिकरणत्वेविवक्षितेसाध्यतावच्छेदकसंबंधेनवाऽऽश्रयेगुणः
स्पंदत्वादित्यत्रातिव्याप्तिः गुणत्वस्यस्वरूपसंबंधेनस्पंदवृत्तित्वात्तदुत्वस्यस्पंदनिष्ठात्यंताभावप्रतियोगितानवच्छेदकत्वा
त् द्वितीयेपक्षवायेनज्ञातेः साध्यत्वेनेयत्वादातिव्याप्तिः ज्ञातित्वनेयव्यक्तिनिष्ठात्यंताभावप्रतियोगितायाः ज्ञातित्वेनानव
एवं च्छेदात् ज्ञातिशून्येयव्यक्तौ चसमवायेनवर्तमानस्याप्रसिद्धत्वात् [illegible]नग्रहोपिव्याख्यातः "अत्यंताभावगर्भलक्षणमपिदुर्वचं न
हि प्रतियोग्यधिकरणीभूतहेत्वधिकरणनिष्ठात्यंताभावेत्यादिगर्भमव्याप्यकमेवसंयोगादिसाध्यकद्रव्यत्वादौ स्वाधिकरणाय
लिंचिद्व्यक्तिवृत्तिप्रतियोगिकात्यंताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुमत्वमित्यत्राधि
पूर्ववत्गुणः स्पंदत्वात्ज्ञातिमान्मेयत्वादित्यत्रातिव्याप्तिः स्वस्वप्रतियोगिनिष्ठाधेयत्वनिरूपकहेत्वधिकरणवृत्त्यत्यंता
भावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुत्वमित्यत्राप्युत्पत्तिकालावच्छेदेनजन्यानांद्रव्याणा
मजन्यानांचप्रलयावच्छेदेनसंयोगनिष्ठाधेयत्वनिरूपकत्वोपगमेसंयोगसाध्यकद्रव्यत्वेकालपरिमाणेचहेतावव्याप्तिः

त्तिरूपसंबन्धविशेष [illegible] साध्यसमानाधिकरणयत्संबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वव्यापकत्वसमानाधिकरणत्संबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वकत्वं समसमानाधिकरणयत्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वव्यापकसाध्यसमानाधिकरणात्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वकत्वं समसमानाधिकरणः सर्वेयद्धूमावच्छिन्नसमानाधिकरणात्तद्धूमावच्छिन्नसमानाधिकरणं साध्यसमानाधिकरण्याभावव्यापकतावच्छेदकसंबंधसामान्याभावत्वकत्वं वाच्यं इदं च साध्य
तावच्छेदकसंबंधेन साध्याधिकरणं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं तद्वृत्तिद्वयं च [illegible] एकसंबंधेन विशेषणतया विशेषे वा बोध्यमिति ॥ ॥ असंगात्सामान्यलक्षणं व्यवस्थापयितुमाह व्याप्तिग्रहश्चेति समानाधिकरणयोरेव व्याप्तिर्नियतेर्यत्नीयधूमवह्न्योः
व्याप्तिविशिष्टधीर्नेयत्नीयवह्न्याप्तिग्रहं विनासत्सामान्यलक्षणं विनानेतिकथितव्याप्तिविशिष्टलक्षणो योद्भूतोयीक्षकैः अत्रचसामान्यलक्षणस्यरूपंयस्य इत्यर्थेसामान्यमेवप्रत्यासत्तिः सामान्यलक्षणंनिरूपकंयस्या इत्यर्थेनुमानंतत्वाद्यमाह सान्द्रियेति इंद्रियेण संबद्धंधूमादितस्यविशेषणंतद्विशेष्यकज्ञानप्रकारीभूतधूमत्वादिरित्यर्थः विशेषणतेत्यत्र भावार्थेनविवक्षितः तत्रविशेषणतायस्या इतिबहुव्रीहिर्वा संबद्धपदस्यैववापरंपरासंबद्धः तत्संबद्धविशेष्यकज्ञानप्रकारोऽर्थः तथाचसैवविशेषणतेत्यर्थः अत्रैवबहिरिंद्रिय
स्यधर्मिणिलौकिकः संबंधः ज्ञानस्यतदिंद्रियजन्यत्वेचनियामकंएवंचाणुत्वेनयत्किंचिदणूपस्थितावपिसकलाणुगोचरोमानसोबोध

इतिवत्[ति] [ना]नधूलीपटलेधूमत्वव्याप्तेनत्ववह्निव्याप्तिग्रहेतत्सामान्यधूमसेनधूमेषुव्याप्यग्रहात्धूमदर्शनादूर्ध्वमनुमितेस्यात् हेत्वभावे
नपरामर्शानुत्पादात् किंचधर्मिणिदोषवशान्नयेनागृह्यमाणेनस्मरणप्रकारीभूतसामान्येन गृह्यमाणेनवालौकिकसन्निकर्षवि
शेषेपिचाक्षुषज्ञानापत्तिरितिपक्षं सामान्येचसर्वंडाखंडभेदेनद्वेधासर्वेडाचखंडभेदेपरंपरयासंबद्धंप्रत्यासत्तिः येनसंबंधेनें
द्रियसंबद्धेसामान्यंज्ञायतेतेनसंबंधेनाधिकरणंसाप्रत्यासत्तिरिति यत्रनानाधिकरणप्रत्यासत्त्यैकव्यक्तिर्घटादिस्तत्यागभावादि
र्वाअनित्यःप्रत्यासत्तिः तत्रतद्भावदशायांतथाप्रत्यासत्त्याज्ञानानुदयप्रसंग इतिचेत् तत्रापिनह्यक्तिर्घटप्रत्यासन्नस्यघटत्वादेरेवप्र
त्यासत्तित्वात् एतदस्वरसेनैववादितीयपक्षमाह अनित्यैवेति अनित्यिका इंद्रियसंबद्धेतादृशज्ञानात्मिका अतीताच्चनुरोधात्सा
मान्यज्ञानमेवप्रत्यासत्तिः अपेक्षणीयंचतद्धिंद्रियकरणकतद्धर्मवत्त्वबोधसामग्र्यंतरं अतएवांधतमसिसौदामिनीसंयोगज
न्येपिद्रव्यप्रत्यक्षेचरमंनचाक्षुषेनिखिलद्रव्यसाक्षात्कारसंतानइतिनुन्नाः इयंचधर्मविषयकज्ञानेधर्मिणंप्रत्यासत्तिः इतरा
तुयद्विषयकज्ञानेनस्य अतएवसुरभिचंदनमित्यादौसौरभलादेरधिभानमिति मनःस्मृतासेति धूमसामानाधिकरण्यंतामावा
प्तियोग्यवह्निसमानाधिकरणवृत्तिधूमत्ववह्निसमवृत्तित्वंवा वह्निसंबंधितावच्छेदकरूपवत्त्वंवाव्याप्तिः एकैवसासर्वधूमसा
धारणीतिभावः व्याप्तेर्ग्रहोतेतुपर्वतीयवह्नेरसन्निकर्षेतत्सामानाधिकरण्यग्रहायोगादन्यदीयवह्निसामानाधिकरण्यस्य च

४०

र्नाश्रयप्रसक्तिरित्युपगमात् अत्रवदंतिप्रसिद्धधूमेधूमत्वेनवाप्रसिद्धेनवा आद्येसंशयोऽप्रसिद्धः द्वितीयेधूमत्वावच्छे

स देनैवव्याप्तिग्रहणतद्विशेषितयोर्नानुपपत्तेः कथमन्यथाहृष्यादिहृत्येवायुत्वाभावव्याप्यत्वनिर्णयेपिरूपंवायुत्वाभावव्याप्यं वा

रीनवेत्यादिसंशयः अनतिरिक्तसंभावनयातथाविशेषनश्चोपस्थितानानतिरिक्तानांविशेषदर्शनाकांक्षतयाऽतिरिक्तरो

पस्थितयेऽवश्यंस्वीकरणीयेतिवक्ष्यतीत्यपेक्षयातीन्द्रियेषुनातिरिक्तत्वसंभावनानेषुविशेषदर्शनात् नाप्यतिरिक्तेरूपत्वसंभावना

स्पान्यत्वनरूपंद्रव्यादयोरसाद्रूपञ्चनरूपं प्रसिद्धरूपमित्यंद्रव्यमित्यंद्रव्यंरसादिवातत्सर्वंनरूपंरूपत्वाभावव्यापकत्वादिविशेषद

अ र्शनेतस्योपयोगात् तदानीमेवोक्तसंशयस्यसर्वजनानुभवसिद्धत्वादतिरिक्तसंभावनायाः गोर्वेणुप्रयोजकत्वाच्च तस्माच्चैवधू

मेरूपेवाधूमत्वरूपत्वावच्छेदेनव्याप्तेरग्रहाद्भिन्नकारसंशययोर्युक्तः यच्चसामान्याभावभानार्थंसास्नीकार्यत्वंविनासकलतत्प्रति

योगिज्ञानासंभवादिति तन्न नत्वभावज्ञानमात्रेलौकिकप्रत्यक्षेवाप्रतियोगिज्ञानेकारणं तत्रसामान्यलक्षणायाद्रव्यत्वादिनाचभानेव्य

ह भिचारान्नानाभावाच्च अनवच्छेदकत्वादिनोपस्थितेतत्रसिभावत्वाभावत्वसंशयः नेजोभावत्वेनोपस्थितेतदयोगात् प्रतियोगिविशेषितेत

न्नानेनुविशिष्टवैशिष्ट्यबोधपर्यवसानात्प्रतीते सकलप्रतियोगिविषयत्वेचुतस्यासिद्धं प्रतियोगिज्ञानस्य हेतुत्वेपिप्रतियोगितावच्छेदक

विशिष्टयत्किंचित्प्रतियोगिज्ञानादेवतत्संभवात् यावत्प्रतियोगिज्ञानत्वेनगोर्वेणुहेतुत्वात् नचतदभावबुद्धौतज्ज्ञानत्वेनहेतुत्वाच्चा

वत्प्रतियोगिज्ञानस्यहेतुत्वमर्थादापन्नमितिवाच्यं भानाभावात् ध्वंसप्रागभावात्यन्ताभावाः प्रतियोग्यादित्रयप्रतियोगिकाः दूषा

ग्रहेष्येकग्रहादेवगृह्णातीत्यभ्युपगमाच्च अंधकारस्तेजोविशेषसामान्याभावोनाभावसमुदायः यावत्तदभावानामेकत्रासंभवात् अ
नुगमाद्दीर्घत्वाच्च तेजोविशेषत्वादिज्ञानस्यतेजःसामग्र्याश्चविरहेतेजोविशेषात्यंताभावप्रागभावादीनांप्रत्यक्षज्ञानमभ्युपगमात् प्राग
भावप्रत्ययोपिप्रतियोगिवृत्तिघटत्वादिप्रकारकज्ञानसाध्यःनप्रतियोगिज्ञानमपेक्षते अत्रघटोभविष्यतीत्यादिप्रत्ययेप्रतियोगि
विशेषिनंप्रागभावमवगाहते नचप्राचीनास्तत्प्रतियोगिनः तत्प्रतियोगिकत्वावगाहनेचभ्रमतेनचनागतेघटेप्रत्यासत्त्येतरभस्ति सामा
न्यप्रत्यासत्याघटत्वेनानुभूतस्मृते चनेतरालंबने कश्चरमकारणरूपसामग्रीवैगुण्यः प्रागभावोवाच्यःअन्यथातदप्रत्ययात् त
स्याप्यस्वरूपसत्त्वात्स्वरूपेणवातात्कालिकयातत्वेनातिप्रसंगात् व्याप्यत्वेनगृहीतायाःतथात्वेवाच्यंतथाचतद्धेतुकाप्रागभावस्यानु
पिनेरेवतावत्कालंप्रागभावस्यासत्त्वेनप्रत्यक्षायोगाच्चेति वाच्यं यादृशकारणकलापानंतरंकार्योत्पादोदृष्टःतद्धेतूरेववंशजकलाभ्यु
पगमात् अनुयोगिनाविशेषादिरूपप्रागभावलाघेभ्रक्वचिदप्यप्रतीतौतादृश्येणानुमानसंभवाच्चेतिचेन्न भविष्यत्त्वेहिनप्रागभा
वप्रतियोगित्वे प्रयोजकंविनाघटोभविष्यतीतिप्रतीतिप्रसंगात् किंतूसत्त्वमेतभविष्यतीत्यादेःसमानार्थकत्वात्वर्तमानप्रागभा
वप्रतियोग्युत्पत्तिकत्वे वर्तमानकालीनात्कालीत्पत्तिकत्वंवातत्वे नचेदमध्यक्षं उत्पत्तेरतींद्रियत्वात् इहाद्यघटोभविष्यतीत्या
दौचतादृशीत्पत्तेर्दंडादिविशेषःकालविशेषश्चाधिकरणत्वेनप्रतीयते नचप्रागभावस्योत्पत्तिमत्त्वेवा अनाद्यकपालनाशजन्य
घटनाशस्यघटाद्यात्मकत्वात्प्रागभावत्वप्रसंगात्तत्रकपालेनेहघटध्वंसोभविष्यतीतिबुद्धिः नचाभवनेभवत्समुत्पद्यप्रागभावोपर

प्रोगभिष्यतिमैत्रे प्रागभोपरध्वोभविष्यतीतिधीः अत्रचधातुनाउत्पत्तिःप्रत्याय्यते प्रत्ययेनचधातुर्यनिष्ठातादृशप्रतियोगित्वं
तादृशकालीनत्वंवा नेष्यतिनश्यतिनष्ट इत्यादौचप्रत्ययेनचयथायथंभूतभागत्वर्तमानातीताचोत्पत्तिः तस्यामेवचकालविशीषा
दिर्विशेषणसेनान्वेति ध्वोभविनाशकेपरध्वोनेष्यतीतिनष्टेचनश्यतीतिव्यवहारस्यात् नस्याच्चनाशस्यविद्यमानत्वात्
ष्ट इत्यादि नचतत्रातीतकालसंबंधित्वंवर्तमानत्वंवानिष्ठादेरर्थः किरक्षिनष्टेघटेपूर्वं द्युर्दिनष्टोऽधुनावैतिव्यवहारप्रसंगादितिपरास्तं
कर्तरिविहितेनाख्यातेनकृताख्यायथायथंभाव्यत्वप्रतियोगित्वलक्षणंकर्तृत्वंभाव्यप्रतियोगिरूपंचकर्तोऽभिधीयतेकार्यानुसाद
दृष्टायांचाभावधीःसामेकात्यंताभावंनगाहते नचप्रतियोगिसमवायिनिषेधयावच्छेदेनात्यंताभावंवृत्तौभानाभावः भाविनिनष्टेवाघटे
इहकपालेघटोनास्तीतिप्रत्ययात् नह्ययंघटप्रतियोगिकाभावमात्रमवगाहते यत्किंचित्घटवत्यपिताद्दशप्रत्ययप्रत्ययप्रसंगात् परंतु
घटत्वावच्छिन्नप्रतियोगिताकं नचप्रागभावध्वंसौतथा संभवतोवातत्रकपाले ततःपूर्वंपरंतत्रबहूनांघटानांनष्टत्वादुसत्त्वप्रमाणाच्च
तत्रैवंकपालाद्यैकरूप्यंध्वंसादिभूत्यंताबुद्धिः अत्यंताभावस्यध्वंसाचविशेषेलादितिचेन्नतदधिकरणस्वरूपादतिरिक्तादनुगतादभा
वाद्वा इहेदानींघटप्रागभावइतिप्रत्ययोनलोकानां अत्रैवंजातोघटइतिवद्युत्पन्नोघटध्वंसइत्यादिविलक्षणप्रत्ययवलेनचनाशोत्प
त्तिरिच्यतां नतुप्रागभावः पूर्वंतत्पूर्वत्वादित्यव्यवहारश्चातीतकालवृत्तितदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वविषयकएव
स्तुदुःखात्यंताभावस्यस्वस्मिन्नुत्तरकालावृत्तिंदुःखसाधनध्वंसंवासमुद्दिश्यक्रियाविशेषेप्रवृत्तिरस्तुप्रमाणंतत्रसिद्धंप्रयोजनघु

तीत्यटप्रागभावव्याप्यायावत्संयोगानामपि [redacted] तज्जनकलेकतिपयक्षणानुसंयोगेषुक्षणेष्वनागतेषुवापटानुत्पत्तिप्रसंगो
नानतत्यटप्रागभावमपेक्ष्यसएवघटोलघीयान् यावत्तानिहक्षेष्व क्षणेनद्विलादयुत्पित्सोर्व्यावर्त्तते पुनः इहेदानीघटध्वंसइतिवदिहे
दानींघटप्रागभावइतिसाधारणेनैवलोकानांप्रत्यक्षंकल्प्यतेतः तद्वलेनप्रागभावसामान्यलक्षणंचव्यवस्थाप्यतेतोवर्णयंति अकार्य
वृत्तेःकार्यस्यद्वितीयक्षणेधारवाहनस्थलेचप्राप्तिकनिर्विकल्पकस्यक्षचतुर्थक्षणेऽनुत्पत्तिकारणमेवकपालेहादिनाकार्याभावस्योत्त
रज्ञानाभावस्यचकारणत्वेवक्तव्ये क्षणाचलात्वात्प्रागभावस्यतत्कल्प्यते तत्स्वभावाधीनाच्चतत्प्रादेशिककालस्यदेशानिर्णयः संयोगादीना
[illegible]नुसर्वत्रतत्संख्याविशेषाणांविशिष्यहेतुत्वाभ्युपगमेनैवतत्तद्द्रव्योत्पादनियमसंभवेपिथुगपद्बहुत्वेषुनित्येषुचत्रित्वादुत्पा
दनेतियाप्तकलेनप्रागभावःकल्प्यतइत्यर्थः ज्ञानेहाहतीनांकार्यकारणभावग्रहेनतदुपस्थितिंविनानचेहाहत्तिकालेज्ञानेहा
साक्षात्कारोयोग्यविभुविशेषगुणयोगग्रहस्यात्मनिनिश्चेधानुमितोज्ञानावंतरसाक्षात्कारेणवज्ञानत्वादिनाहेहाहिजनकज्ञाना
दिकंगृह्णातीत्युपेयतइति [illegible] तौर्वायर्योपरिचयेधर्मिस्वरूपग्रहेपिकारणत्वग्रहसंभवात् इहाहत्यनुत्पादस्थलेज्ञानेहयोः
साक्षात्कारत्वज्ञानेहासामान्यव्यतिरेकनियतेहाकृतिव्यतिरेकग्रहेनसत्कार्यकारणभावग्रहस्यसर्वत्रास्याभ्युपेयत्वात् हत्यनुत्पा
व दृश्यलेज्ञानेहयोः हत्यनंतरं इहाकृत्योश्चसमूहालंबनसाक्षात्कारस्यस्मरणेनज्ञानानुमानस्यसंभवात् विशेषगुण्यवहेदेनयुग ४२
पद्विशेषप्रतिपत्तौसादवत्इहाहत्तिकालेज्ञानोत्पादेप्यविरोधाच्च गोत्वेचगोनिष्ठाभावप्रतियोगित्वेनसंभवेतत्वेनचविशेषितमपि

हत्वेणाप्यसिद्धत्वस्यानुपपत्तेश्च अनुवृत्तसामान्यलक्षणं विनाधिक्षयकालः सुखवैराग्यभावकालः सुखोत्पादकालीनध्वंसप्रतियोगि
